5390

32

आत्मनिरूपणम् (वेदान्तम्)

पत्राणि ३२ (सम्पूर्णम्)

पू ३६०-च

नं० २०४

ले० सच्चिदानन्दः

नं० ५३-६०-घ
आत्मनिरूपणम् (वेदान्तम्)
पत्राणि ३२ (सम्पूर्णम्)
आर्याव्याख्याकार: सच्चिदानन्द:
८

नं० २० ई आत्मनिरूपणम्
३२ प.
कर्ता सच्चिदानन्द।
(वेदान्त)

आ॰ ॐ श्रीगणेशाय नमः श्रीशंकराचार्यगुरुपादुकाभ्यां नमः प्रचंडपाखंडविखंडनोद्यतं त्रयी
नि॰ टी॰ शिरोर्थप्रतिपादनेरतं बुधैर्युतं योगकलाभिरावृतं नमामि तं शंकरदेशिकं नतम् । इह खलु
१ सकलशिष्टाग्रणीर्भगवान् शंकराचार्यः जिज्ञासुजनानुकंपया सकलवेदांतसिद्धांतरहस्य
प्रदर्शने परं वेदांतप्रकरणमारभमाणस्तदादौ श्रीगुरुनमस्कारलक्षणं मंगलाचरणमार्या-
वृत्तद्वयेनाकरोत् श्रीगुरुमिति श्रीगुरुचरणद्वंद्वं श्रीगुरूणां पदसरोजद्वयं वंदे नमस्करोमि

श्रीगुरुचरणद्वंद्वं वंदे द्वंद्वमथितदुःसहद्वंद्वं शांतिग्रहोपशांतिं पांसुमयं यस्य
भसितमातनुते ।

अहं प्रकरणकर्ता किं भूतं चरणं द्वंद्वं मथितमुन्मूलितं दुःसहं सु-
गुरूणामसह्यं द्वंद्वं द्वैतं येन तत् तथा किंच यस्य चरणद्वंद्वस्य पांसुमयं रजः प्रचुरं भसितं भस्म
तद्रजोरूपा विभूति शांतिग्रहोपशांतिं इति शांतिरेव ग्रहः यस्तस्योपशांतिं विनाशं तनुते वि-
स्तारयति संपादयतीत्यर्थः । देशिकवरमिति तं देशिकवरं देशिकेषु आचार्येषु वरं श्रे-
ष्ठं दयालुं कृपाशीलं गुरुं अहं वंदे नौमि किंलक्षणं निहतसकलसंदेहं निहता नाशिताः ।

सकलाः सर्वे संदेहाः हृदयशंकवः येनासौ निरस्तसकलसंदेहस्तं सकः यच्चरणद्वयं परमसरोज
द्वन्द्वमद्वयं द्वैतरहितमनुभवं साक्षात्स्वरूपबोधमुपदिशति तत्पदस्वार्थे अनुभवविशेषणमेतत्
तत्पदलक्षार्थे गुरुतत्त्वनिरूपे मंगलाचरणं तस्मुख्येनात् गुरुदेवतयोरैक्यचिंतनं विद्याप्रमावेतरेण गमि
निष्पत्तिरपि यस्य देवे परा भक्तिरित्यादिका इदानीमधिकारिविषयसंबंधप्रयोजनात्मकमनुबंधं च।
तद्द्वयं निरूपयति तन्निरूपणस्यावश्यकत्वात् तत्र प्रथमतः अधिकारस्वरूपमाह २ संसारेति संसार

देशिकवरं दयालुं वंदेहं निरस्तसकलसंदेहं यच्चरणद्वयमद्वयमनुभवमुपदि
शति तत्पदस्वार्थे २ संसारदावपावकसंतप्तः सकलसाधनोपेतः।

एव दावः गहनं तस्य पावकोऽग्निर्दावानलस्तेन संतप्तः परमोद्विग्नस्तत एव सकलसाधनोपेतः सर्वसा।
धनयुक्तः साधनानि तु नित्यानित्यवस्तुविवेकः इहामुत्र फलभोगविरागः शमादिषट्कसंपन्नमुमुक्षुत्वं।
नि एतानि एवंभूतोऽधिकारी तस्य निरूपणानि श्रुतौ स्थितं परार्थैक्यप्रतिपादनयोग्यैर्वाक्यैरुपनि·
षद्वचनैः शिष्य अधिकारी गुरुणा ब्रह्मनिष्ठेन प्रबोध्यते उपदिश्यते तद्विज्ञानार्थं स गुरुमेवाभि·
गच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं तस्मै स विद्वानुपसन्नाय सम्यक्प्रशान्तचित्ताय शमान्विता·

आ.
नि॰टी॰
२

येतिश्रुतेः दैशिकोपदेशलभ्यैव ब्रह्मविद्या न स्वबुद्धिकल्पनया तर्कादिना वा ३ इदानीमात्मनस्त्रैकालि
कसत्ताप्रदर्शनार्थं विद्वदविद्वत्साधारणानुभवेनात्मनोस्तित्वं साधयन् विषयं प्रदर्शयति अस्तीति
अस्ति स्वयमित्यस्मिन्नर्थे आत्मा स्वयमस्ति कालत्रयाबाध्यस्तिष्ठतीत्यत्र भवे कस्यापि पुंसः विदुषो
वाः विदुषो वा पुरुषस्य संशयः संदेहः अस्ति किं कस्यापि नास्तीत्यर्थः स्वस्यात्मा तिष्ठतीति सर्वै
र्मनुष्यैरनुभूयते असन्नेव स भवति असद्ब्रह्मेति वेद चेत् अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदु

स्वात्मनिरूपणनिपुणैर्वैदिकैः शिष्यः प्रबोध्यते गुरुणा ३ अस्ति स्वयमित्यस्मिन्न
र्थे कस्यास्ति संशयः पुंसः अत्रापि संशयश्चेत् संशयिता यः स एव भवसि त्वम् ४
नाहमिति वेत्ति योऽसौ सत्यं ब्रह्मैव वेत्ति नास्तीति ।

रिति श्रुतेः अत्रापि आत्मनोस्तित्वेऽपि संशयश्चेत् यः संशयिता संदेहकर्ता स एव त्वं आत्मा भव
सि अस्तित्वनास्ति तयोरनुभविता त्वमेवेत्यर्थः ४ ननु नाहमस्मीत्येवं प्रकारकोपि कस्यचिदज्ञस्य
जायतेऽनुभवः कथमहमस्मीत्येवानुभवस्तत्राह नाहमितीति नाहमिति वेत्ति योऽसौ नाहम
स्मीति यो जनात्यसौ सः नास्तीति नास्तित्वसाक्षित्वेनापि सत्यमबाध्यं ब्रह्मैव वेत्ति आत्मानमेव जाना २

ति अहमस्मीति विजानन् अहंप्रत्ययगोचर आत्मा सर्वदा विद्यमानस्तिष्ठतीत्यनुभवन्नसौ पुरुषः ब्र
ह्मैव विजानातन्नु भवति स्वयम् विनाप्रयासेनेत्यर्थः ५ नन्वस्तित्वनास्तित्वप्रत्ययाभ्यां ब्रह्मैवानुभूयत इ
ति चेत् किमिति सर्वैर्नानुभूयते ऽत आह ब्रह्मत्वमेवेति तस्मादस्तित्वनास्तित्वगामित्वात् स्वस्वब्रह्मत्व
मेवानुभूयते सर्वैः अतस्त्वमेव ब्रह्म तर्हि नाहं ब्रह्मेति अनुभवस्य कारणमित्यत आह नाहं ब्रह्मेति यज्ज्ञान
महं ब्रह्मत्वं भवामीति यज्ज्ञानं तदिदं मोहमात्रं भ्रान्तिरेवाविद्याजनितत्वात् स मोहः सर्वानर्थजनक इत्याह

अहमस्मीति विजानन् ब्रह्मैवासौ स्वयं विजानाति ५ ब्रह्मत्वमेव तस्मान्नाहं ब्रह्मे
ति मोहमात्रमिदं मोहेन भवति भेदः क्लेशाः सर्वे भवन्ति तन्मूलाः ६

मोहेनेति मोहेन भवति भेदः नाहं ब्रह्मेति भ्रान्त्या भेदो भवति भेदो नाम क्लेशादिभिः कलुषीकृतपरिच्छि
न्नजीवस्वरूपो जीवत्वलक्षणः भवति जायते सर्वेऽपि क्लेशा अविद्यास्मितारागद्वेषाभिनिवेशाः अनित्याशु
चिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या दृग्दर्शनयोरेकात्मतैवास्मिता सुखानुशयी रागः दुः
खानुशयी द्वेषः स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः इति पञ्चसूत्राणि पातञ्जलिनोक्तानि अ
विद्यादिक्लेशानां लक्षणभूतानि तन्मूला भेदजनितानि भवन्ति अतोऽविद्याजनितनाहं ब्रह्मेति
जीवोऽहमिति भेदबुद्धिस्त्याज्येत्यर्थः ६

आ॰
नि॰ टी॰
२

3

इदानीं यतो भेदमूलाः क्लेशा भवंतीत्युक्तं अतस्तदाश्रयान्पंचकोशान्विविचयेमाह नक्लेशपंचकमिति
इदं क्लेशपंचकमविद्यादि कृतपंचकोशविवेकपुरुषः न भजते नाश्रयते अतएव कुशलधियो विवेककुश
लाः पुरुषाः सततं पंचकोशान्विविंचंतीति विचारयंति पंचकोशस्थिताः क्लेशा नात्मधर्मा इति निश्चयं कुर्वं
तीत्यर्थः ७ ननु कोशानां विवेचनेन किं फलमित्यत आह अन्नप्राणेति नामभिर्निरूपितानामेतेषामन्न

न क्लेशपंचकमिदं भजते कृतकोशपंचकविवेकः अतएव पंचकोशान्कुशल
धियः सततं विविंचंति ७ अन्नप्राणमनोमयविज्ञानानंदपंचकोशानां ए
कैकांतरभाजां भजति विवेकात्मकोशतामात्मा ८ वपुरिदमन्नमयाख्यः को
शो नात्मा जडो घटप्रायः ॥

मयादिकोशानां विवेकाद्विवेचनादात्मा प्रकाशते
मयोऽन्तरत्वं याति प्राप्नोति किंलक्षणानां कोशानामेकैकांतरभाजां एकस्यैकस्यांतरे मध्ये तिष्ठतां अन्न
मये प्राणमयः प्राणमये मनोमयः इत्यादिक्रमेण तिष्ठताम् ८ इदानीं पंचकोशानां स्वरूपदर्शनपूर्व
कमनात्मत्वं साधयति तत्र प्रथममन्नमयकोशस्य स्वरूपमाह वपुरिति वपुरिदमन्नमयाख्यः कोशः
इदं शरीरमन्नमयनामा कोशः अयं कोशः आत्मा न भवति जडत्वाज्जन्यत्वाच्चेत्येतन्मात्रमाह वपुरिति

वपुरिदमन्नमयं च चक्षुर्दृष्टमहत्त्वः यथा घटो जडो न स्वप्रकाशोऽस्ति श्रुतौ तथाहैन युक्तिरपि प्रदर्श्यते उत्पत्तेः प्राक्
पश्चाच्च विध्वंसानन्तरमपि तदभावस्यापि तस्याविद्यमानत्वस्य दृश्यमानत्वादनुभूयमानत्वात्तस्मादात्मत्वेन हि
तत्तत्स्मृद्धमित्यर्थः ४ इदानीं प्राणमयकोशस्य तत्त्वरूपदर्शनेन स्वैकमनात्मत्वं साधयति कोशः प्राणम
य इति प्राणमयः प्राणविकारो वायुविशेषो वपुष्यवच्छिन्नः अन्नमयकोशान्तर्गतः प्राणमयनामा कोशो
भवति अस्य प्राणमयकोशस्य कथमात्मता स्यादात्मता न संभवतीत्यर्थः कुतो न संभवतीत्यत आह

प्रागुत्पत्तेः पश्चात्तदभावस्यापि दृश्यमानत्वात् ४ कोशः प्राणमयोऽयं वायुवि
शेषो वपुष्यवच्छिन्नः अस्य कथमात्मता स्यात्तत्तस्याम्भ्यामुपेक्षुधः पीडाम् ५
कुरुते वपुष्यहंतां गेहादौ यः करोति ममतां च रागद्वेषविशेषो नासावात्मा
मनोमयः कोशः ॥ तत्तस्मादशनपिपासाभ्यां पीडामुपेक्षुधः विकलतां प्राप्नुवतः आत्मा
त्वं दुःसंभावितमित्यर्थः ५ इदानीं मनोमयकोशस्याप्यनात्मतां साधयति कुरुत इति कुरुते करोति व
पुष्यहंतां शरीरे अहमित्यभिमानमथ च गेहादौ गृहादिविषये च ममतां ममैते गृहादयो विषया इत्यभि
मानं यः मनोमयकोशः किंलक्षणो मनोमयः रागद्वेषविशेषः रागद्वेषौ विशीर्यते येनासौ रागद्वेषवि
शेषः रागद्वेषधर्मीत्यर्थः असौ मनोमयः कोशः आत्मा न भवति रागद्वेषादिहेतुत्वादित्यर्थः ॥

आ·
नि·टी·
ध

इदानीं विज्ञानमयकोशस्याप्यनात्मत्वं साधयति सुप्ताविति सुप्तौ सुषुप्त्यवस्थायां स्वरूपेण विली
नात्वयस्यात्मा भवति बोधे च जाग्रदवस्थायां सकलेन खशिखाग्रपर्यन्तं कलेवरं शरीरं व्याप्याप्य·
तिष्ठति विज्ञानशब्दवाच्या विज्ञानशब्दाभिधेया बुद्धिरपि चित्सन्निधिं विना यस्माच्चिच्चैतन्यं प्रतिबिंब·
तया तिसात्मा न भवति सुषुप्तौ विलीनत्वादित्यर्थः ॥१२॥ इदानीमानन्दमयकोशस्यानात्मत्वं प्रतिपा
दयति सन्निगतैरिति सन्निगतैः सर्वक्लेशैः सुषुप्तावलम्ब्य मानः सर्वक्लेशैः सुखी भवामीति सर्व
महमस्मात्साभिनियोऽभिमन्यते ज्ञानात्मसावानन्दनामाकोशः अहंकारशब्दवाच्यः सोऽहंकारस्यात्मा

सुप्तौ स्वयं विलीनात्वाद्बोधे व्याप्ता कलेवरं सकलं विज्ञानशब्दवाच्या चित्तति विंबा
न बुद्धिरप्यात्मा ॥१२॥ सन्निगतैः सर्वक्लेशैरभिमन्यते यः सुखी भवामीति ।

कथं भवेत् न भवतीत्यर्थः एतेन पंचकोशानामात्मत्वनिराकरणेन तत्तत्कृतिषु कत्राभासः प्रतिपादि
तवौद्धदिवादिमतेनिराकरणं बोध्यम् न चान्नमयाद्यात्मत्वप्रतिपादिकाः श्रुतयस्तैत्तिरीयादावुप
लभ्यन्ते तेषामयमाशयः यतो वा इमानि भूतानि जायन्ते इत्यनया श्रुत्या जगत्कारणत्वं ब्रह्म
णो लक्षणं प्रतिपादितं न चान्नमयकोशस्य प्रतिपादिकाभिः श्रुतिभिः प्रतिपाद्यते नापि श्रु
तयः अन्नं ब्रह्मेति व्यजानात् अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते अन्नेन जातानि जीव ८

नीत्यं तेनान्नमयस्य ब्रह्मत्वं प्राणो ब्रह्म व्यजानादित्युपक्रम्य प्राणाद्ध्येव खल्विमानि भूतानि जायन्त इत्यं तेन मनोम
यस्य विज्ञानं ब्रह्मेति व्यजनाद्विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते इत्यं तेन विज्ञानमयस्य आनंदो ब्र
ह्मेति व्यजानात् आनंदाद्ध्येव खल्विमानानि भूतानि जायन्त इत्यं तेन आनंदमयस्य श्रुक्तयोः पितत्र प्रद-
र्शितैतैः न च नसंभवति श्रुतीनामन्यथानार्थक्यम् प्रतिकोशोपासनार्थेनानासेन च ब्रह्मदृष्टिः कर्तव्ये
ति यथा शालिग्रामादिप्रतिमादिषु विष्ण्वादिबुद्धिलक्षणस्याद्रोहादावादिनोः विद्यानुत्तर इष्यत इति प्राप्ते गि

आनंदकोशनामासोऽहंकारः कथं भवेदात्मा १३ यः स्फुरति विश्वभूतः स भवेद्दाने
ष्वेव सकलात्मा प्रागूर्ध्वमपि च सत्त्वाद्यधिकारित्वादबाध्यमानत्वात् १४

कं निरूपितं १३ इदानीमात्मनस्तत्स्वरूपं प्रदर्शयति यः स्फुरति विश्वभूत इति यः स्फुरति विश्वभूतः वि
श्वेनैनदेहेष्वाधिष्ठानेन स्फुरति प्रकाशते स आनंद एव आनंदस्वरूप एव सकलात्मा सर्वेषां प्राणिना
मात्मा तत्र हेतवः प्रागूर्ध्वमपि अन्नमयादीनामुत्पत्तिविनाशानंतरं सत्त्वात् विद्यमानत्वात् अविका
रित्वाद्धिकाररहितत्वादबाध्यमानत्वाद्यथायोगं वाह्यज्ञानमानंदं ब्रह्मेत्यादिश्रुतिभ्यश्चात्मा चिवि-
षयपरिच्छेदशून्यः आनंदस्वरूपः सिद्धः १४

स्वा. नि. टी. ५ नन्वन्नमयाद्याद्यनुभूयं तेनात्मास्ति चेन्न सर्वैः कृत्स्नेनानुभूयतेऽतः एतद्व्यतिरिक्तः आत्मा नास्तीति
चेदुच्यते अन्नमयादेरिति अन्नमयादेरस्मात्सर्वानुभवगोचरात् कोशपंचकादपरमात्मतत्त्वेनानुभूयते
किंचित् किमपि वस्त्विति चेदुच्यते नहि अन्नमयादिनाऽनुभविता तेषां ज्ञाता एतेऽन्नमयादय इति ज्ञा
नवानन्योऽस्तीत्यस्मिन्नर्थे कस्यचित्कस्यापि पुरुषस्यापलापो भ्रान्तिरस्ति नास्तीत्यर्थः सर्वैरपि वादिभिर्ज्ञे
यपदार्थान् ज्ञाताभिन्न एवैषोऽनुभूयते १४ नन्वनुभवनीयपदार्थानुभविताऽन्य आत्मपदार्थोऽस्तीति चेत्.

5

अन्नमयादेरस्मादपरं यदि नानुभूयते किंचित् अनुभविताऽन्नमयादेरस्तीत्यस्मि
न्न कश्चिदपलापः १५ स्वयमेवानुभवत्वाद्यद्यप्येतस्य नानुभाव्यत्वम् सकृ
दप्यभावशंका न भवेद्बोधस्वरूपसत्तायाः १६

स्यापि कश्चिदनुभविताऽपेक्षित इति चेदुच्यते स्वयमिति स्वयमेव स्वस्यात्मनोऽनुभवरूपत्वाद्यद्यपि न
स्यात्मनोऽनुभाव्यत्वमनुभवगोचरत्वं नास्तीत्येतावता सकृदप्येकस्मिन्नपि कालेऽभावशंकात्मनः
नास्तीत्येवंप्रकारा न भवेन्न जायते बोधस्वरूपसत्ताया ज्ञानस्वरूपविद्यमानत्वस्य कालत्रयेऽपि ज्ञान
स्वरूपत्वेनात्मनोऽभावो न संभवति जगदांध्यप्रसंगादित्यर्थः १६

अनुभवस्वरूपस्यात्मनोऽनुभाव्यत्वं न भवतीति दृष्टान्तप्रदर्शनेनोच्यते अनुभवतीति आत्मानुभवस्वरूपो
विश्वं सर्वं तदनुभवति जानाति विश्वेन सर्वजगताऽसौ आत्मा न वाऽनुभूयेत अनुभवगोचरीन क्रियेत
अविद्याकार्येणाखिलेनेत्यर्थः अत्रायं तत्र दृष्टान्तः भानुः रविः विश्वं जगदशेषं समग्रं प्रका-
शयन् भासयन् विश्वेन जगता कदाप्यसौ न प्रकाश्यते प्रकाशस्याविद्यारूपत्वात् तस्मादनुभवप्र-
काशरूपत्वात् कालत्रयेऽप्यात्मनो भावकत्वं न भवतीत्यर्थः ९ इदानीं चित्तस्य ब्रह्मणः स्वरूपमाह

अनुभवति विश्वात्मा विश्वेनासौ न वाऽनुभूयेत न खलु प्रकाश्यतेऽसौ विश्वमशेषं
प्रकाशयन्भानुः ९ तदिदं नाहं शमीहं शमेनैतावन्नावदिति च यन्न भवेत्
ब्रह्म न दृश्यवद्वेद्यं नो चेद्विषयो भवेत्परोक्षं च १०

तदिदमिति तत्परोक्षं इदमपरोक्षं
नाहं शमं अनुमानगोचरमीहे अहं प्रमत्तविषयस्वरूपमेतावदेतावत्परिमाणं तावत्परिमाणं यद्ब्रह्म न भवे-
त् न भवति तर्हि ब्रह्म कथमवधेयमित्याकांक्षायामाह ब्रह्मेति ब्रह्मात्मस्वरूपेण दृश्यवद्वेद्यं ज्ञातव्यं
यदुक्तं प्रकारेण तदिदं नाहं शमीहं शमेनैतावन्नावदिति च यन्न भवेदित्युक्ते तद्दृश्यवद्वेद्यमिति यत्तदोसं-
वेद्यः नो चेदन्यथा विषयो भवेत् प्रमाणविषयत्वं स्याद्ब्रह्मणः परोक्षत्वं च तस्मात्सर्वप्रमाणावभासकं २

इदानीमित्याद्याकारेणस्फुरितेवस्तुबाध्यमाने यदवस्तुस्फुरति सआत्मेत्याह इदमिति इदमिदमितिप्रतीतेवस्तुनि इदंवस्त्वित्याकारेणज्ञातेवस्तुनिपदार्थेबाध्यमाने बाधितेसति यदनिदमिदंशब्दावाच्य मबाध्यंबाधाप्रतियोगितत्वं तत्तुस्य एतस्यब्रह्मणः सत्वात्कालत्रयेपि विद्यमानत्वाच्चपरोक्षत्वं सर्वदाप्यनुभूयमानत्वादबाध्यत्वमपरोक्षत्वंचेत्यर्थः १९ ननुवेद्यत्वेनब्रह्मणःपरोक्षत्वंभविष्यतीत्यतआह नावेद्यमिति

इदमिदमितिप्रतीतेषुवस्तुनिसर्वेषुबाध्यमानेपि अनिदमबाध्यंतत्वंसत्वादेतस्य नचपरोक्षत्वं १९ नावेद्यमपिपरोक्षंभवतिब्रह्मस्वयंप्रकाशत्वात् सत्यंज्ञानमनंतंब्रह्मेत्येतस्यलक्षणंश्रूयते २० सतिकोशषट्कापायेसंभवतस्तस्यजीवतेश्वरते ॥

ब्रह्मावेद्यमप्यविज्ञेयमपिपरोक्षंनभवति यतःस्वयंप्रकाशत्वात् यत्स्वप्रकाशरूपं नतद्वेद्यंनभवति यथासूर्यः नन्वस्वप्रकाशरूपत्वमेवब्रह्मणः कथमित्यतआह सत्यमिति सत्यंज्ञानमनंतंब्रह्मेति श्रुतिरेवतस्यब्रह्मणःलक्षणं सत्यज्ञानानंतात्मकं श्रूयतेप्रकटयतीत्यतोबाध्यत्वं वस्वप्रकाशत्वंचब्रह्मणःसिद्धमित्यर्थः २० ननुसर्वोपाधिरहितस्यब्रह्मणः कथंजीवत्वमीश्वरत्वंच श्रुतिभिःप्रतिपाद्यतेऽतआह सतीति कोशषट्कापायो अन्नमयादिकोशषट्कापायाशक्तिरविद्या ।

तद्रूप उपाधौ सति विद्यमाने सति तस्य ब्रह्मणः जीवत्वेश्वरत्वे जीव ईश्वर इति विभेदव्यवहारो भवति नो
चेत्कोशात्मोपाधिर्नास्तीति चेत्तयोरभावाज्जीवत्वेश्वरत्वयोरभावात् विगतविशेषं विशेषरहितं निज
स्वरूपमात्मस्वरूपं विभाति प्रकाशते सर्वोपाधिविलये स्वप्रकाशानन्दरूप आत्मैव प्रकाशत इत्यर्थः २१
ननु सर्वोपाधिविलये सति किमपि नावशिष्यत इति चेत्तत्राह सतीति सकलदृश्यबाधे सति न किमप्यस्ती
ति यल्लोकसिद्धं चेत् तन्नाम यत्र किमपीति सिद्धं न किमपीत्यनेन शब्देन प्रतिपादितं तद्ब्रह्म वेदान्त उपनिष

नो चेत्तयोरभावाद्विगतविशेषं विभाति निजरूपं २१ सति सकलदृश्यबाधे न किमप्य
स्तीति लोकसिद्धं चेत् यत्र किमपीति सिद्धं ब्रह्म तद्वेदान्तवेदतः सिद्धं २२ एवमपि
विरहितानां तत्त्वमस्यादिवाक्यविचिन्तया प्रतिभाति परोक्षवदात्मा प्रकाशमानोऽपि २२

द्वाक्यैः सिद्धं प्रतिपादितं यल्लोके किमपि नावशिष्यते सर्वबाधेन तदुपनिषद्वाक्यैरस्तीति प्रतिपाद्यत इत्यर्थः २२
पञ्चकोशविवेकेन तत्साक्षितया आत्मा इत्थं प्रतिपादित इदानीं पञ्चकोशविवेकवतामपि तत्त्वमस्यादिवाक्या
र्थज्ञानेन विना आत्मबोधो न भवतीत्याह एवमपीति एवं पञ्चकोशविचारयुक्तानामपि तत्त्वमस्यादिवा
क्यविचिन्तया विचारेण विरहितानां वाक्यविचारशून्यानामित्यर्थः प्रत्यक्तोऽप्यात्मा परोक्षवत्प्रतिभाति सम्यग्
भानीत्यर्थः स्वप्रकाशमानोऽपि सर्वैःस्वसंवेद्यभासमानोऽपि वाक्यार्थविचाराभावाद्भानीत्यर्थः २२

अ. नि. टी.

८

तस्माद्वाक्यविचारः कर्तव्य इत्याह तस्मादिति तस्माद्यतो वाक्यविचारेण विनात्मज्ञानं न संभवति त-
स्माद्धेतोर्वाक्यविचारस्यावश्यकत्वात् तस्य च पदार्थज्ञानाधीनत्वात् पदार्थशोधनपूर्वकं वाक्यार्थं चिंतयन्
विचारयन्नधिकारी तत्त्वेनात्मानमपरोक्षयति साक्षात्करोति केवलं सद्गुरोरेव वाक्यविचारादात्मानुभ-
वो न भवति किंतु दैशिकदयाप्रभावात् गुरुकरुणासामर्थ्यात् भवति गुरुमुखतः विचारे क्रियमाणे आ-
त्मलाभो भवति नान्यथेति भावः २४ इदानीं पदार्थज्ञानाधीनत्वाद्वाक्यज्ञानस्य क्रमतो पदार्थविचारमाह

तस्मात्पदार्थशोधनपूर्वकं वाक्यस्य चिंतयन्नर्थं दैशिकदयाप्रभावादपरोक्षयति त-
त्त्वेनात्मानम् २४ देहेन्द्रियादिधर्मानात्मन्यारोपयन्नभेदेन कर्तृत्वाद्यभिमानी
बोधः स्यात्त्वंपदस्य वाच्योऽर्थः २५

देहेन्द्रियादिधर्मानिति तत्र प्रथमं तत्त्वमसीति वाक्ये
पदद्वयं तत्त्वमसीति तत्त्वंपदस्यार्थद्वयं वाच्यलक्ष्येति तत्र प्रथमं त्वंपदवाच्यार्थं दर्शय-
ति देहेन्द्रियादिधर्मानिति देहेन्द्रियादिधर्मान् स्थूलत्वकृशत्वादेहधर्मान् काणत्वबधि-
रत्वादीन्द्रियधर्मानात्मनि चैतन्ये आरोपयन् अभेदेन तादात्म्येनाध्यस्यन् स्थूलोऽहं कृशोऽहं
मित्याकारेण देहधर्मारोपः काणोऽहमित्याकारेणेन्द्रियधर्मारोपः एवमारोपपूर्वकं कर्तृत्वाद्य-
भिमानी यो बोधः विज्ञानकोशाध्यारोपपूर्वकं कर्ताहमित्यभिमानात्मको यो बोधः स्याद्वाच्यो भवति

८

सत्वंपदस्यवाच्योर्थ एवंशवलार्थमित्यपिचवदंति २५ इदानींत्वंपदस्यलक्षणार्थमाह देहाहंतेन्द्रिया
णामिति देहाहंतेन्द्रियाणां शरीराहंकारकरणानां साक्ष्यपिच तेभ्योदेहादिभ्योपिलक्षणत्वेन तद्भिन्नत्वे
नयोववोधः प्रतिभासतेऽसौ त्वंपदस्यलक्ष्योर्थः देहाद्युपाधिरहितत्वाच्छुद्धस्वरूपमित्यर्थः २६ इदानींत
त्पदस्यार्थं विभजते वेदावसानवाचेति वेदावसानवाचोपनिषद्वा वेद्यं यत्संवेद्यं ब्रह्मसकलजगदुपा
दानं प्रपंचकारणमथच सर्वज्ञताद्युपेतम् सर्वज्ञत्वादिलक्षणं चैतन्यं चिद्रूपं तत्पदस्यवाच्योर्थ

देहाहंतीन्द्रियाणां साक्षी तेभ्यो विलक्षणत्वेन प्रतिभाति योववोधः श्रीकोऽसौत्वं
पदस्यलक्ष्योऽर्थः २६ वेदावसानवाचां संवेद्यं सकलजगदुपादानं सर्वज्ञताद्युपे
तं चैतन्यं तत्पदस्यवाच्योऽर्थः २७ विविधोपाधिविमुक्तं विश्वातीतं विशुद्धमद्वैतं
अक्षरमनुभववेद्यं चैतन्यं तत्पदस्यलक्ष्योऽर्थः २८

जगत्कारणत्वसर्वज्ञत्वोपाधिविशिष्ट
त्वादित्यर्थः २७ इदानींतत्पदस्यलक्ष्यार्थमाह विविधोपाधिविमुक्तमिति विविधोपाधिविमुक्तं
कल्पितलक्षणोपाधिरहितं विश्वातीतं प्रपंचरहितं विशुद्धमज्ञानरहितमतएवाद्वैतं द्वैतरहितमक्ष
रं विनाशरहितमनुभववेद्यमनुभवगम्यं यच्चैतन्यमात्मस्वरूपं तत्तत्पदस्यलक्ष्योर्थः २८

ग्र० नि० टी० ८

एवं पदार्थे विवेचिते सति वाक्यार्थबोधः सामानाधिकरण्यत्रितयज्ञानेन विना न भवत्यतः सामाना-
धिकरण्यत्रितयं दर्शयति सामानाधिकरण्यमिति सामानाधिकरण्यं नाम एकार्थनिष्ठत्वं तत्त्वंपदयोः त-
दनु तदनन्तरं विशेषणविशेष्यता नाम पदार्थयोर्विशेषणविशेष्यभावः लक्ष्यलक्षकत्वं लक्ष्यलक्षक-
त्वं नाम आत्मनो लक्ष्यलक्षकत्वभावः एवं त्रिविधः संबंधः २९ इदानीं सामानाधिकरण्यस्वरूपमाह ए-

सामानाधिकरण्यं तदनु विशेषणविशेष्यता च अथ लक्ष्यलक्षकत्वं भवति पदार्था-
त्मनोश्च संबंधः २९ एकत्र वृत्तिरर्थे शब्दानां भिन्नवृत्तिहेतूनां सामानाधिकरण्यं भ-
वतीत्येवं वदन्ति लाक्षणिकाः १० प्रत्यक्तत्त्वपरोक्षत्वे परिहृत्य तत्सद्वितीयत्वम् ।

कत्र वृत्तिरिति भिन्नप्रवृत्तिहेतूनां भिन्नार्थविशिष्टानां शब्दानामेकस्मिन्नर्थे वृत्तिः वदन्ति सामाना-
धिकरण्यं सामानाधिकरण्यसंज्ञावाच्यं भवतीत्येवं लाक्षणिका लक्षणप्रतिपादका वदन्ति १० इदानीं
तत्त्वमसीत्यस्मिन्वाक्ये लक्षणां विना बोधो न भवत्यतो लक्षणाया आवश्यकत्वमित्याह प्रत्यक्तत्त्व-
परोक्षत्वमिति प्रत्यक्तत्त्वपरोक्षत्वयोर्विरोधात्परिहृत्य तत्सद्वितीयत्वयोरपि तथात्वात् इदं द्वयं
परस्परं विरुद्धं सहानवस्थानात् तत्र लक्षणया भवितव्यं तत्त्वंपदयोरर्थे एवं विरुद्धार्थत्वा ८

द्विरुक्तार्थत्यागेनाविरुद्धार्थबोधाय लक्षणा स्वीकर्तव्येत्यर्थः ॥ इदानीं लक्षणास्वरूपमाह मानान्तरे ।
परोपस्थ इति मानान्तरे परोपस्थे प्रमाणान्तरसंवादे मुख्यार्थस्य प्रतिपाद्यार्थस्यापरिग्रहे ज्ञाने सति मुख्यावि
नाकृतेऽर्थे मुख्यार्थसंबद्धेऽर्थे पदानां या वृत्तिर्वर्तनं यत्सैव लक्षणा प्रोक्ता लक्षणा प्रतिपादकेत्यर्थः
लक्षणास्वरूपमुक्तं काव्यप्रकाशे मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् अन्योऽर्थो लक्ष्यते यत्सा ल
क्षणा प्रोच्यते बुधैरिति ॥ सा च लक्षणा त्रिविधा जहदजहज्जहदजहद्भेदादित्याह तत्र प्रथमतः

> इत्येतन्नेविरुद्धं न न दिह भविभव्यमेव लक्षणया ॥ मानान्तरे परोपस्थे मुख्यार्थस्या
> परिग्रहे ज्ञाने मुख्याविनाकृतेऽर्थे या वृत्तिः सैव लक्षणा प्रोक्ता ॥ निखिलमपि ।
> वाच्यमर्थं त्यक्त्वा वृत्तिस्तदन्वितेऽन्यार्थे जहतीति लक्षणा स्याद्गङ्गायां घोष इतिवदव
> नग्राह्या ॥ वाच्यार्थमत्यजन्त्या यस्या वृत्तेः प्रवृत्तिरन्यार्थे ॥

जहल्लक्षणामाह निखि
लमपीति निखिलमपि समग्रमपि वाच्यं पदवाच्यमर्थं त्यक्त्वा तदन्विते वाच्यार्थान्वितेऽन्यार्थे भिन्नार्थे
या पदस्य वृत्तिः सा जहल्लक्षणोच्यते उक्तसा जहल्लक्षणा भवतीत्याह गङ्गायां घोष इत्यत्र यथा इयं ज
हल्लक्षणा तत्त्वमसीति पदयोर्न ग्राह्याः अत्र समग्रपदार्थत्यागाभावात् अर्थैकदेशग्रहणात् न संभवती
ति भावः ॥ इदानीमजहल्लक्षणामाह वाच्यार्थमिति वाच्यार्थं पदयोरर्थमत्यजन्त्या अजहत्या यस्या वृत्तेः

शक्येऽस्वार्थे वाच्यादन्यार्थे भिन्नार्थे या वृत्तिर्वर्त्तनं साऽजहतीति लक्षणा कथिता लेकारिकै विमृश्य:
तस्या उदाहरणमाह शोणो धावतीति वदेदिति शोणो धावतीत्यत्र शोणगुणस्य धावनासंभवात्तद्गुणाश्रयग्रहण
स्त्वोणगुणस्याश्वस्य ग्रहणादियमजहतीयं लक्षणाऽस्मिन् वाक्ये न ग्राह्या वाच्यार्थस्यात्यागात् १७ इदानीं जहदजहल्ल
क्षणामाह जहल्लजहतीति वाच्यार्थस्य भागात्यक्तार्थस्य ग्रहणात् या वाच्यार्थैकदेशं वाच्यार्थलक्षणोऽय
मेकदेशान्तरमपहाय स्वलक्ष्यैकदेशं बोधयति लक्ष्यार्थलक्षणमेकदेशं बोधयति सा जहदजहल्लक्षणा

इयमजहतीति कथिता शोणो धावतीति वदेत्तत्र न ग्राह्या १८ जहदजहतीति सा स्या
द्या वाच्यार्थैकदेशमपहाय बोधयतीत्येकदेशं सोऽयं द्विज इति वदाश्रयेदेनां १९
सोऽयं द्विज इति वाक्यं स्वाक्षापरोक्षापरोक्षदेशाद्यं द्विजमात्रलक्षकत्वात्कथयत्येकं
पदार्थयोरुभयोः १९

तस्या उदाहरणं सोऽयं द्विज इति सोऽयं देवदत्त इत्यत्र तद्देशतद्देशकालवैशिष्ट्य·
विभागे न देवदत्तस्वरूपमात्रस्य ग्रहणादेनां जहदजहल्लक्षणामाश्रयेदङ्गीकुर्यात् १९ तामेव लक्षणां
प्रतिपादयति सोऽयमिति सोऽयं द्विज इति वाक्यं सोऽयं देवदत्त इति वाक्यं स्वाक्षापरोक्षापरोक्षदेशा
द्येन तत्कालेनैतत्काल तद्देशैतद्देश विशिष्टत्वं हित्वा द्विजमात्रलक्षकत्वाद्देवदत्तस्वरूपमात्रज्ञापकत्वात्त
दर्थयोरेकं स्वरूपमात्रं कथयति अखण्डार्थबोधकत्वादियमात्र ग्राह्येत्यर्थः १९

प्रतिपादितं जहदजहल्लक्षणां तत्त्वमस्यादिवाक्ये योजयति तद्वदिति तद्यथा सोऽयं देवदत्त इतिवाक्यवत्तत्त्व
मसीतिवाक्यमपि परोक्षत्वापरोक्षत्वादीनि तत्पदगतं परोक्षत्वं त्वंपदगतमपरोक्षत्वं त्यक्त्वा हित्वा ऽथ च चिद्रू·
पत्वं लक्षयित्वा चैतन्यस्वरूपमात्रं लक्षयित्वा ऽसिपदेन स्पष्टमसंदिग्धमैक्यं तत्पदत्वंपदार्थयोरैक्यं बोधयति २०
दर्शितप्रकारेण वाक्यार्थबोधवत्तां फलं दर्शयति इत्थमिति इत्थमुक्तमिति प्रकारेण बोधितमर्थं वाक्या
र्थं दर्शितेनैकेन वाक्येन तत्त्वमस्यादिवाक्येन अहमिति दर्शितं चैतन्यस्वरूपमात्मतत्त्वं तदहमसीत्यपरोक्ष

तद्वत्त्वमसीति त्यक्त्वा परोक्षत्वापरोक्षत्वादीनि चिद्रूपं लक्षयित्वा बोधयति स्पष्टम् ।
असिपदेनैक्यं १७ इत्थं बोधितमर्थं महता वाक्येन दर्शितेनैकेन अहमित्यपरोक्षयतो वे
दो वेदयति वीतशोकत्वं १८ प्रायः प्रवर्तकत्वं विधिवचसां लोकवेदयोर्दृष्टम्
सिद्धं बोधयतोऽर्थं कथमेतद्भवति तत्त्वमस्यादेः १९

एतां साक्षात्कुर्वतामधिकारिणां वीतशो
कत्वं शोकरहितत्वं ब्रह्मत्वं वेद उपनिषद्भागः वेदयति बोधयति एवं वाक्यार्थज्ञाने सति अविद्यानिवृत्तिरानंदा
वाप्तिश्च भवतीत्यर्थः १८ ननु विधिवचसामेव प्रवर्तकत्वं न तत्त्वमस्यादिवाक्यानां विध्यर्थवादविलक्षणत्वा
दित्याशंकाते प्राय इति प्रायः बहुधा प्रवर्तकत्वं प्रवृत्तिजनकत्वं विधिवचसां विधिवाक्यानां लोकवेदयोः लौकि
कवाक्ये वेदवाक्ये च दृष्टं सिद्धमर्थं बोधयतः ब्रह्मस्वरूपमर्थं प्रकाशयतः तत्त्वमस्यादेर्वाक्यस्य कथमेतद्भवति

स्वा० नि० टी० १०

10

यतः प्रवर्तकत्वं न संभवतीत्यर्थः ॥४९॥ इत्याक्षेपे उत्तरमाह विधिरिति विधिरेव विधिवाक्यमेव प्रवृत्तिं जन-
यतीति न विधिरेव प्रवर्तक इति नु किं तु अभिलषितवस्तुबोधोऽपि ईप्सितपदार्थज्ञानमपि प्रवर्तक इ-
ति अभिलषितबोधस्य प्रवर्तकत्वं दृष्टमित्यत आह राजेति राजा भवति सुतोऽभूदिति बोधेन लो-
कः स्वयमेव प्रवर्तते राजा भवतीति बोधे राजप्रदर्शनादिप्रवृत्तिर्लोकस्य स्वयमेव भवति प्रव-
र्तकवाक्याभावेऽपि सुतोऽभूदित्यत्रापि जातकर्मादौ प्रवर्तते तस्माद्विधिवाक्यमेव प्रवर्तकमिति

विधिरेव न प्रवृत्तिं जनयत्यभिलषितवस्तुबोधोऽपि राजा भवति सुतो-
ऽभूदिति बोधेन प्रवर्तते लोकः ॥५०॥ ऐक्यपरैः श्रुतिवाक्यैरात्मा शश्वत्प्रका-
शमानोऽपि देशिकदयाविहीनैरपरोक्षयितुं न शक्यते पुरुषैः ॥५१॥

नीतिभावः ॥५०॥ इदानीं विधिविलक्षणैरपि तत्त्वमस्यादिवाक्यैः केवलैर्गुरुकृपां विनाऽऽत्मसाक्षात्-
कारो न भवतीत्याह ऐक्यपरैरिति ऐक्यपरैरखण्डार्थप्रतिपादकैर्वाक्यैस्तत्त्वमस्यादिवाक्यैः श-
श्वत् निरन्तरं प्रकाशमानोऽपि स्वरूपेणावभासमानोऽप्यात्मा देशिकदयाविहीनैर्गुरुकृपावि-
धुरैरपरोक्षयितुं साक्षात्कर्तुं न शक्यते न पार्यते पुरुषैः पण्डितैरपीत्यर्थः गुर्वनुग्रहलभ्येयं
ब्रह्मविद्या सर्वविद्यावरिष्ठत्वात् ॥५१॥ १०

इदानीं कर्मोपासनादिभिः स्वच्छः सन्तः शुद्धाधिकारी वा कार्यविचारेण स्वयमेवात्मसाक्षात्कार
वान् भवति किं गुरुणेत्याह विहितकाम्यनिषिद्ध इति विहितकाम्यनिषिद्धस्त्यक्तकाम्यनिषि
द्धकर्मा विहितानुष्ठानविमलस्वान्तः नित्यनैमित्तिककर्माचरणनिर्मलान्तःकरणोऽधिकारी स्व
यमेव बोधं भजन्नात्मसाक्षात्कारवान् भवति गुरुणा किं गुरोः किं प्रयोजनम् तन्मेलकारण गु
रुशिष्यप्रश्नैव केवलमिति वसिष्ठोक्तेष्वितिनया श्रोत्तपकैश्चैव नमन्तव्यमनत्ज्ञेयम् ४२ इदानी

विहितकाम्यनिषिद्धो विहितानुष्ठानविमलस्वान्तः भजति स्वयमेव
बोधं गुरुणा किमिति नयानमन्तव्यं ४२ कर्मभिरेव न बोधः प्रभव
ति गुरुणा विनिदयानिधिना आचार्यवान् हि पुरुषो वेदेत्यर्थस्य वेद
सिद्धत्वात् ४३

कर्मभिरेव चित्तशुद्धिद्वारा बोधो भवतीत्युक्तं तन्निराकरोति
कर्मभिरिति कर्मभिरेव विहितनित्यकर्मादिभिरेव बोधः आत्मसाक्षात्कारो न भवति न जायते
दयानिधिना कृपासमुद्रेण गुरुणा विना श्रोत्रियं ब्रह्मनिष्ठं विशेषणविशिष्टेनाचार्येण विनानस
भवति कुत आचार्यवान् पुरुषो गुरूपसेवनवान् वेदजानातीत्यर्थस्य वेदसिद्धत्वात् आचा
र्यवान् पुरुषो वेदेति श्रुतेरित्यर्थः ४३ । न तु सर्वप्रमाणवेद्यब्रह्मावबोधवान् रूपस्य वेदस्य·

श्रा॰ कथं प्रामाण्यं यद्वा नानभ्युदितं येन वागभ्युद्यत इति श्रुतेः इत्याकांक्षायामाह वेदोनादितयेति वेदोऋ
नि॰ टी॰ ग्यजुःसामाथर्वणभेदरूपः अनादितया उत्पत्तिरहितत्वेन यद्वा परमेश्वरप्रणीततया वा ईश्वरनिःश्वास
११ रूपेणाभिव्यक्तत्वेन वा एतस्य महतो भूतस्य निःश्वसितमेतदृग्वेद इति श्रुतेः परमं प्रमाणं भवति
सर्वप्रमाणश्रेष्ठं भवति ब्रह्मबोधकत्वात् उपनिषद्वाक्यप्रमाणव्यतिरेकेण स्वतः परतो वा स्वव्या
परतोऽन्यप्रमाणादिना वा बोधो आत्मसाक्षात्कारो नास्तीत्यर्थः ४४ ननु वेदः आत्मबोधे प्रमाणमस्तु

वेदोऽनादितया वा यद्वा परमेश्वरप्रणीततया भवति परमं प्रमाणं बोधो नास्ति
स्वतस्य परतो वा ४४ नापेक्षते यदन्यद् यदपेक्षतेऽखिलानि मानानि वा
केनचिद्विगमानां मानं ब्रह्माद्यनीहिया वगतौ ४५

प्रमाणान्तरसापेक्षमप्यस्तु अनुमानवत् अनुमानस्य प्रत्यक्षोपजीवकत्वादित्याकांक्षायामाह ना
पेक्षत इति नापेक्षते नाकांक्षति यत् श्रुत्याख्यं प्रमाणं अन्यत् प्रमाणान्तरं तस्याप्यपेक्षा प्रमाणां
तराणां नास्तीति वेदखिलानि मानानि सर्वप्रमाणानि यदपेक्षन्ते आकांक्षन्ति तद्विगमानां वा
के प्रमाणभूतं ब्रह्माद्यनीहिया वगतौ आत्मावगतौ वा दिशाद्येन स्वर्गावगतौ च मानं अनीहिये
ब्रह्माद्यवगमे वाक्यसदृशं प्रमाणं नास्तीत्यर्थः ४५ ११

इदानीं प्रमाणांतरबोधकबोधे मानांतरापेक्षा नास्तीत्याह मानमिति मानं प्रमाणं बोधयंतं प्रमाणानाम
पि बोधकत्वं बोधयंतं तानेयेमं इदमानेन प्रमाणेन बुभुत्संते बोद्धुमिच्छंति तेऽज्ञाः एधोभिरिंधनैरेव दहनं दग्धुं वा
ञ्छंति दाहकस्य दाहेन दाहकत्वमिच्छंति ते पुरुषाः अतिशयेन महात्मानस्ते मते विज्ञा इति सोपहासव
चनं सर्वप्रकाशकसूर्यस्य यथान्यप्रकाशापेक्षा नास्ति तद्वदात्मनोऽपि बोधरूपस्य बोधकान्तरापेक्षा नास्तीत्य
र्थः ४९ ननु वेदस्यात्मनिमत्तेऽनादित्वस्य बोधकत्वं कथमित्याकांक्षायामाह वेद इति वेदः अनादि आदिरहित :

मानं प्रबोधयंतं प्रबोधमानेन ये बुभुत्संते एधोभिरेव दहनं दग्धुं वांछंति ते महात्मानः
४९ वेदोऽनादिरशेषव्यंजक ईशः स्वयंप्रकाशात्मा तदभिव्यक्तिर्दृष्टा प्रोक्तो सो सूरिभिः।
प्रमाणमिति ५० रूपाणामवलोकवत्तरिवान्यत्रकारणं दृष्टं तद्वदृष्टावगतो वेदव
इत्यानवेदकोऽहं ४९

उत्पत्तिरहितः अशेषवेदस्य ईशः व्यंजकः प्रकाशकः यथा स्वतः सिद्धस्य घटा
देरव्यंजकवत्ः तद्वत् ननु ईश्वरस्यापि तथापरप्रकाश्यत्वं स्यादत आह स्वयमिति ईश्वरस्तु स्वयं स्वरूपेण प्रकाशात्मा
प्रकाशस्वरूप एव न तु प्रकाश्यः तदभिव्यक्तिः शुद्धिरूप एवाभिव्यक्तिर्वा प्रकटत्वं दृष्टा ज्ञाता सूरिभिः सर्वाचार्यैः सो
वेदः प्रमाणमिति प्रोक्तः कथितः ५० इदानीं दृष्टान्तप्रदर्शनेनात्मावबोधं प्रति वेदस्यैव प्रामाण्यं नान्यस्येति साधय
ति रूपाणामिति रूपाणां नीलपीतादीनामवलोके दर्शने चक्षुरिव नेत्रेंद्रियमिवान्यत्र कारणमन्यदिंद्रियं.

नकारणं दृष्टं अन्यकारणं नास्तीत्यर्थः तदनुत्वलिङ्गिदियवदृष्टाभावगतौ अनन्तभूतात्माभावगतौ स्वर्गादेवावेदव
द्वेदमदृशोऽन्यः वेदकोऽहन्तर्नास्तिनतिष्ठति ४८ ननु निगमानां यथास्वतःप्रामाण्यं तथा तन्त्राणामपि स्व
स्वित्याकोऽत्याद्यामाह निगमेष्विति निगमेषु वेदेषु निश्चितार्थं प्रमाणीकृतार्थं कश्चिदाचार्यः तन्त्रेषु शा
स्त्रेषु प्रकाशयति प्रतिपादयति तदिदं तत्प्रतिपादनमनुवादमात्रं उक्तस्यैवार्थस्य प्रशंसावचनेऽनुवादो यथा

निगमेषु निश्चितार्थं तन्त्रेषु कश्चिदपि प्रकाशयति तदिदमनुवादमात्रं प्रामा-
ण्यं न स्वसिद्ध्यति न किंचित् ४९ अंशद्वयवति निगमे साधयति द्वैतमेव कोऽप्य-
र्थः अद्वैतमेव वस्तु प्रतिपादयति प्रसिद्धमपरोंऽशः ५०

ति तदुक्तत्वात् अनुवादस्य
प्रामाण्यं न किंचित् किमपि प्रामाण्यत्वमित्यर्थः ४९ वेदप्रमाणमित्युक्ते तस्यांशद्वयं तत्कार्यं चेदानीं द-
र्शयति अंशद्वयवतीति अंशद्वयवति भागद्वययुक्ते निगमे वेदे एकांशः प्रथमो भागः द्वैतं साधयति भेदं
प्रतिपादयति कर्तृकर्मफलादिरूपं अद्वैतमेव वस्तु ब्रह्मस्वरूपं सर्वभेदरहितमपरोंऽश उपनिषद्भागः
प्रतिपादयति प्रसिद्धं सर्वानुभवगोचरमिति वस्तुविशेषणम् ५०

ननु द्वैताद्वैतयोः प्रमाणभूतवेदप्रतिपाद्यत्वात् कस्य सत्यत्वं कस्यासत्यत्वमित्याकांक्षायामाह अद्वैतमि
ति अद्वैतमेव सत्यं यद् द्वैतं वस्तु ब्रह्मस्वरूपं तदेव सत्यं तस्मिन् द्वैते द्वैतं प्रपंचस्वरूपमसत्यं मिथ्याभूत
मध्यस्तमारोपितं तत्र दृष्टान्तः यथा शुक्तिकायां रजतं नैरोप्य मृगतृष्णायां मरीचिकायां वा उदकस्फुर
णं उदकभानं तद्वदित्यर्थः ॥५१॥ ननु वैपरीत्यमेव कुतो न भवति द्वैते अद्वैतारोपः इत्याकांक्षायामाह आरो
पितमिति आरोपितमध्यस्तं यदि चेदद्वैतं वस्तु सत्यस्वरूपं द्वैतेऽसत्ये तदा तस्मिन्नुक्तेन स्यात् वस्तु·

अद्वैतमेव सत्यं तस्मिन् द्वैतं न सत्यमध्यस्तं रजतमिव शुक्तिकायां मृगतृष्णायामिवोद
कस्फुरणं ॥५१॥ आरोपितं यदि स्यादद्वैतं वस्तु वस्तुनि द्वैते युक्तं नैव तदा स्यात् सत्येऽध्यासो भ
वत्यसमानो ॥५२॥ यद्यारोपणमुभयोस्तद्व्यतिरिक्तस्य कस्यचिद्भावः आरोपणं न शून्ये त
स्मादद्वैतसत्यताग्राह्या ॥५३॥

भावात् सत्येऽध्यासो वस्तुस्वरूपे आरूपोऽसमानो भवति न सत्यवस्तुरूपतादित्यर्थः ॥५२॥ ननु सत्यासत्ययोरु
भयोरध्यारोपणमुभयविलक्षणवस्तुनि स्यादित्याकांक्षायामाह यद्यारोपणमिति यदि चेदारोपणमध्या
स उभयोः सत्यासत्ययोस्तदा तद्व्यतिरिक्तस्योभयविलक्षणपदार्थस्य कस्यचित् कस्याप्यभावः अन्यपदार्थो
नास्तीत्यर्थः ननूभयविलक्षणं शून्यमस्ति तत्र कुतोऽध्यासो न भवतीत्याह आरोपणमिति शून्ये वस्तुनि आरो
पणं कस्यचिन्न भवति यतस्तस्मादद्वैतसत्यताद्वैतवस्तुनः सत्यताग्राह्याङ्गीकर्तव्येत्यर्थः ॥५३॥

एवंभूतेऽद्वैतवस्तुनि श्रुतिरेव प्रमाणमित्याह प्रत्यक्षेति प्रत्यक्षाद्यनवगतं प्रत्यक्षादिप्रमाणैरनवबोध्यमेवं
रूपमद्वैतं ब्रह्म श्रुत्यैव प्रतिपादनीयं तर्हि द्वैतमपि श्रुत्यैव प्रतिपादनीयमित्याकांक्षायामाह द्वैतमिति द्वैतं
न प्रतिपाद्यं श्रुत्या किमिति तस्य द्वैतस्य स्वयमेव स्वभावत एव लोकसिद्धत्वाल्लौकिकैरेवाविद्याद्वैतैः प्रतिपादित
त्वादित्यर्थः ५४ ननु श्रुतिरद्वैतमेव प्रतिपादयति न द्वैतं किमित्याकांक्षायामाह अद्वैतमिति अद्वैतं सुखरूपम
द्वैतस्य सुखरूपत्वात्सर्वस्य प्राणिनः सुखमेवेष्टं न दुःखमिति द्वैतं तु दुःसहदुःखमसह्यकष्टं सदा भवेत् इति

प्रत्यक्षाद्यनवगतं श्रुत्या प्रतिपादनीयमद्वैतम् द्वैतं न प्रतिपाद्यं तस्य स्वयमेव लोकसिद्ध
त्वात् ५४ अद्वैते सुखरूपे दुःसहदुःखं सदा भवेद्द्वैते यत्र प्रयोजनं स्यात्प्रतिपादयति
श्रुतिस्तदेवासौ ५५ निगमगिरा प्रतिपाद्यं वस्तु यदानन्दरूपमद्वैतं स्वाभाविकस्वरूपं
जीवत्वं तस्य केचन ब्रुवते ५६

रंतरं भवति तस्माद्यत्र प्रयोजनं स्यात् यत्रापेक्षा भवति तदेव प्रतिपादयति दर्शयति असौ श्रुतिः तत्त्वम
स्यादीनि वेदान्तवाक्यानीत्यर्थः ५५ इदानीमद्वैतानंदरूपस्य ब्रह्मणः जीवत्वमपि स्वाभाविकमित्याशंकते
निगमेति निगमगिरोपनिषद्वाक्यैः प्रतिपाद्यं सिद्धांतितं यदानंदरूपमानंदघनमद्वैतं वस्तु ब्रह्म तस्य जीवत्वं
स्वाभाविकस्वरूपं जीवस्वरूपतापि स्वत एवेति केचन पंडितंमन्या वदंति अविद्याकृतत्वादित्यर्थः ५६

इदानीं यदाशंकितं ब्रह्मणः स्वत एव जीवत्वमिति तन्निराक्रियते स्वाभाविकमिति तस्य ब्रह्मणः विशदवि
त्तमेः निर्मलज्ञानरूपस्य जीवत्वं यदि स्वाभाविकं स्वत एव स्याद्भवेत् तर्हि तज्जीवत्वं जीवस्वभावत्वं सकृदपिक
दाचिदपि विनाशं निराकरणमर्हति वा येन न गच्छेत् प्राप्नुयात् स्वाभाविकधर्मस्य तु निर्वार्यत्वात् यथा वह्नेरु
ष्णप्रकाशस्वभावत्वमनिवार्यं तद्वदित्यर्थः ५७ निराकृतमपि ब्रह्मणः जीवत्वं स्वत एवेति यद्यपि जीवः
साधनैर्ब्रह्मोपासनादिभिस्तद्रूपत्वं प्राप्नोतीत्याशंक्यते यद्वदिति यद्वत् यथा अयः लोहं यान्तः रसविद्धं

स्वाभाविकं यदि स्याज्जीवत्वं तस्य विशदवित्तमेः सकृदपि न तर्हि नाशं गच्छेदुष्णप्रकाशव
द्वह्नेः ५७ यद्वदयो रसविद्धं काञ्चनतां याति तद्वदेवासौ जीवः साधनशास्त्रापरतां यातीति
केचिदिच्छन्ति ५८ तदिदं भवति न युक्तं गतवति तस्मिन् चिरेण रसवीर्ये ।

सन् केनचिद्रसेन पारदेन वौषधिरसेन वानुप्रविष्टं काञ्चनतां याति सुवर्णरूपं भवति तद्वदसौ जीवः सा
धनशास्त्राकृतापरतां याति प्राप्नोतीति इति केचिदिच्छन्ति केचिद्वदाशंकन्ते सिद्धान्तानभिज्ञत्वात् ५८ इदानीं
जीवः साधनशास्त्रापरतां यातीत्यपि मतं निराकरोति तदिदमिति तदिदं मतं न युक्तं युक्तिसिद्धं न भव
ति कुतः प्रथमतः दृष्टान्तमेव प्रतिपादितं दूषयति रसवीर्येण रसशास्त्रा काञ्चनतां गतं लोहं चिरेण

आ॰
नि॰ टी॰
१८

चिरकालेन रसवीर्ये गतवति नष्टे सति हेमो वर्णः स्ववर्णरूपतां अयः समारूढः अयस्मिन्गतः प्रणाशं प्रतिपद्यते प्राप्नोति पुनरपि अयः स्वरूपतां प्राप्नोतीत्यर्थः ८९ दार्ष्टान्तिकेऽपि साधितमर्थं निराकरोति जीवत्वमपीति जीवत्वमपि जीवस्वरूपमपि इदं तथा अयोदृष्टान्तवत् बहुविधसुखदुःखलक्षणोपेतमनेकप्रकारसुखयुतमेतादृशं साधनशतैराकृतागतमिव नष्टमिव प्रतिभात्येव परं तु विनाशं न प्रयाति

प्रतिपद्यते प्रणाशं हेमो वर्णोऽप्ययः समारूढः ८९ जीवत्वमपि त
थेदं बहुविधसुखदुःखलक्षणोपेतं गतमिव साधनशतैः प्रतिभा
त्येव प्रयाति न विनाशं ९० तस्मान्न तावदिष्टो जीवः सततं स एव
जीवः स्यात् एवं यदि परमात्मा परमात्मैवायमिति भवेद्युक्तम् ९१

न नश्यतीत्यर्थः ९० इदानीं जीवस्य स्वतो जीवत्वे अङ्गीक्रियमाणे दोषमाह तस्मादिति तस्मात्कारणाद्यदि चेज्जीवः स्वतः स्वभावतः जीवरूपेण स्यात् सः सततं निरन्तरं स जीव एव स्यात् तस्य स्वरूपबोधेन जीवत्वनिवृत्तिर्न स्यादित्यर्थः एवमनेन प्रकारेण यदि चेत्परमात्मा स्यात्तर्हि परमात्मैवायमिति भवेद्युक्तं सम्यक् स्वरूपतोऽयं परमात्मैव उपाधिवशाज्जीवत्वप्राप्तिः उपाधिलये परमात्मस्वरूप एवेत्यर्थः ९१ १८

इदानीं स्वरूपतापत्तिं निराकरोति यद्विवेति यदि वा परतां तेरेणायं जीवः साधनबलेन उपासनादिबलेन
परेण परमात्मना साम्यसरूपतां भजति प्राप्नोति चेत्तदपि साम्यरूप्यमपि कियता कालेन साधनशक्तिना।
यावधिकालेन नश्यत्येवेति सकलैः प्राज्ञैर्निश्चितं निर्णीतम् यत्कृतकं तन्नश्यत्येवेत्यर्थः ९२ इदानीं यथा
कुलक्षणगुरूपदिष्टवेदान्तश्रवणादिना ब्रह्मस्वरूपतासंपादनीयेत्याह तस्मादिति तस्मात्परं दुर्निवारस्व
कीयं सर्वथा मोहममविद्याख्यं मोहात्मकं मोहस्वरूपं समस्तं जीवत्वलक्षणं स्वज्ञानेन स्वात्मावबोधेन·

यद्विवापरेणासाम्यं जीवश्चेद्भजति साधनबलेन कालेन तदपि कियता नश्यत्येवेति
निश्चितं सकलैः ९२ तस्मात्परं स्वकीयं मोहं मोहात्मकं च समस्तं स्वज्ञानेन जहिताश्र
णः स्वयमेवावशिष्यते नान्यत् ९३ सत्यज्ञानानन्दं प्रकृतं परमात्मरूपमद्वैतं ब्रह्मबोध
यति निखिलाः श्रुतयः स्मृतिभिः समं समस्ताभिः ९४

जहित्वा दूरीकृत्य सर्गाः सर्ववस्तु
स्थितः ब्रह्मैवात्मस्वरूपः स्वयमेव स्वरूपेणैवावशिष्यते नान्यत् द्वितीयं किंचिदवशिष्यते सर्वप्रपंच।
विलापनेन ब्रह्मस्वरूपमेवावतिष्ठतीत्यर्थः ९३ ननु प्रपंचविलापनेन ब्रह्मस्वरूपमेवावशिष्यत इत्यत्र किं प्रमाण
मित्यत आह सत्यज्ञानानन्दमिति सत्यज्ञानानन्दं सत्यज्ञानादिस्वरूपं प्रकृतं तत्त्वेषु परमात्मरूपमद्वैतं द्वैतरहितमे
वलक्षणं निखिलाः समस्ताः उपनिषद्रूपाः श्रुतयः समस्ताभिः स्मृतिभिः सहिता बोधयन्ति प्रतिपादयन्ति ९४

इदानीमेकत्वबोधकानामुपनिषद्वाक्यानामवान्तरवाक्यान्यस्मिन्नर्थेऽभिधीयन्त इत्याह एकत्वेति एकत्वबोध
कामद्वैतप्रतिपादकानां निगमवाक्यानामुपनिषद्वाक्यानां शेषभूतान्यवशिष्टान्यङ्गान्यङ्गभूतानि वा
क्यान्तराण्येकत्वप्रतिपादकान्यभिधीयन्ते स्म उच्यन्ते स्म देवेन सूत्रकारादिभिर्वा अवान्तरवाक्यानि तत्स्र
ष्टिस्थितिप्रलयसंयमनप्रवेशादिप्रपञ्चविधायकवाद्रूपाणि यतो वा इमानि भूतानि जायन्त इत्यादीनि ९१
इदानीं सर्वोपाधिरहितमद्वैतात्मज्ञानं तत्त्वमस्यादिवाक्येभ्यः कथं भवतीत्याशङ्क्याह यस्मिन्निति यस्मि

एकत्वबोधकानां निखिलानां निगमवाक्यजालानां वाक्यान्तराणि सकलान्यभि
धीयन्ते स्म शेषभूतानि ९२ यस्मिन्मिहिरवदुदिते तिमिरवदपयाति कल्पनादीनि
ज्ञानं विरहितभेदं कथमेतद्भवति तत्त्वमस्यादेः ९३ कर्मप्रकरणनिष्ठं ज्ञानं।
कर्माङ्गमिष्यते शास्त्रैः ॥

यज्ज्ञाने मिहिरवत् सूर्यवदुदिते सत्युदयं प्राप्ते सति कल्पना
दीनि तिमिरवदपयान्ति नश्यन्ति एतादृशमेतत् ज्ञानं विरहितभेदं विगतभेदं तत्त्वमस्यादेः तत्त्वम
स्यादिवाक्येभ्यः कथं संभवति न संभवति बोधकत्वाभावादित्यर्थः ९३ इदानीमेवंविधेन ज्ञा
नस्य कार्याङ्गत्वमाशङ्क्योत्तरार्द्धेन निराकरोति कर्मप्रकरणनिष्ठमिति कर्मप्रकरणनिष्ठं
कर्मप्रकरणस्थितं ज्ञानं कर्माङ्गमग्निहोत्राद्यङ्गमिष्यते ॥

प्रतिपाद्यते शास्त्रे मीमांसकपण्डितैः तन्न संभवति प्रकरणभेदादित्याह भिन्नप्रकरणभाज इति भिन्न
प्रकरणभाजः भिन्नप्रकरणस्थायाः तयोः ज्ञानस्य कर्माङ्गत्वं कथं भवेत् न संभवति भिन्नप्रकरणत्वादि
त्यर्थः ९७ प्रकरणभेदेन ज्ञानस्य कर्माङ्गत्वं निराकृत्य इदानीमधिकारिविषयभेदेनापि तन्न सं
भवतीत्याह अधिकारिविषयभेदाविति अधिकारिविषयभेदौ अधिकारी च विषयश्चाधिका
रिविषयौ तयोर्भेदौ ययोस्तौ कर्मज्ञानात्मकौ कर्मज्ञानप्रतिपादकौ उभौ काण्डौ कोऽर्थः वेदः काण्डद्व

भिन्नप्रकरणभाजः कर्माङ्गत्वं कथं भवेज्ज्ञाने ९७ अधिकारिविषयभेदौ कर्मज्ञा
नात्मकावुभौ काण्डौ एवं सति कथमनयोरङ्गाङ्गित्वं परस्परं घटते ९८ ज्ञानं कर्मणि न
स्याज्ज्ञाने कर्मेदमपि तथा न स्यात् कथमनयोरुभयोस्तपनतमोवत्समुच्चयो घट्यते ९९

यात्मकः कर्मकाण्डज्ञानकाण्डात्मकः कर्मकाण्डज्ञानकाण्डयोश्चाधिकारिविषयौ भिन्नावित्यर्थः एवं स
ति अधिकारिविषयभेदे सति कथमनयोर्ज्ञानकर्मणोरङ्गाङ्गित्वं गुणप्रधानभावत्वं घटते न घटत इ
त्यर्थः ९८ इदानीं यथा ज्ञाने कर्म प्रकरणनिष्ठं न भवति तथा कर्मापि ज्ञानप्रकरणनिष्ठं न भवती
त्याह ज्ञानमिति यथा ज्ञानमात्मज्ञानं कर्मणि कर्मप्रकरणे न स्यात् न संभवति तथेदं कर्मापि
ज्ञाने ज्ञानप्रकरणे न स्यान्न संभवेत् एवं सति कथमनयोरुभयोर्ज्ञानकर्मणोः ।

लपनतमोवत्स्वीयकारयोरिवसमुच्चयसहावस्थानलक्षणं एकाधिकरणं नघटते नसंभ
वति विरुद्धत्वादित्यर्थः ६९ इदानीमविद्यानिवृत्तौ ज्ञानमन्यत्सहायंनापेक्षत इत्याह तस्मा
दिति तस्माद्यतःसहायान्नेपेक्ष्यमतः कारणाज्ज्ञानमोहनिवृत्तौ वविद्यानिवृत्तौ वन्यत्कर्मादिकं
सहायं सहकारिणंप्रार्थयते नापेक्षते अनन्यसहायत्वमेवदृष्टांतेनप्रतिपादयति यद्वदिति
यद्वद्यथा घनतरतिमिरप्रकरध्वंसने निविडांधकारदूरीकरणे सहस्रांशुः सूर्यः सहायं ना

तस्मान्मोहनिवृत्तौज्ञानंनसहायमन्यदर्थयते यद्वद्घन
तरतिमिरप्रकरपरिध्वंसनेसहस्रांशुः ७० ज्ञानंत
देवममलंसाक्षीविश्वस्यभवतिपरमात्मा संवध्यतेनध
र्मैःसाक्षीतैरेवसच्चिदानंदः ७१

नापेक्षते तद्वदित्यर्थः ७० इदानींज्ञानशब्दार्थमाह ज्ञानंतदेवमिति ज्ञानंज्ञानशब्दवाच्यं तदेव
सर्वानुभवसिद्धमेव यःविश्वस्यसाक्षीजगतः ज्ञातापरमात्माब्रह्मस्वरूपः सज्ञानंभवति सज्ञा
नरूपः आत्मासाक्षीतैर्धर्मैरविद्यापरिकल्पितैर्नसंवध्यते अविद्यापरिकल्पितत्वात् अतएवसच्चि
दानंदः सच्चिदानंदरूपः समास्तेवद्दृष्टैव नतद्धर्मी ७१

ननु तान न रूप आत्मा कल्पितैर्धर्मैर्न संबध्यते चेत्तस्य साहित्यं केन संबंधेनेत्यत आह रज्वादेरिति यथा रज्वादेर्वस्तुन
उरगाद्यैरुरगमालाधाराद्यैः संबंधः दृश्यसंबंधः तथात्मनः कर्तृत्वादिधर्मैः संबंधः दृश्यसंबंधः आत्मनो द्रष्टृ
त्वात् न त्वन्यः संबंधः संयोगः समवायो वा कृतो न भवतीत्यत आह सततमिति सततं निरंतरं अयमात्मा
संगः सर्वसंबंधरहितः तस्यासंगत्वे श्रुतिं प्रमाणयति श्रुतिरसंगश्रुतिरमुमसंगत्वलक्षणमर्थं साधय
ति प्रतिपादयति एषनेतिनेत्यात्मेत्युपक्रम्य अगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसंगो न हि सज्जते

रज्वादेरुरगाद्यैः संबंधस्तस्य दृश्यसंबंधः सततमसंगोऽयमिति श्रुति
रप्यमुमर्थमेव साधयति ॥१२॥ कर्तृत्व कर्म चैव यस्य स्फुरति ब्रह्मैव तन्न।
जानाति यस्य न कर्तृ न कर्म स्फुटतरमयमेव वेदितक्रमते ॥१३॥

शितो न व्यथते न रिष्यत्यभयं वै जनक प्राप्तोसीति बृहदारण्यकी श्रुतिः ॥१२॥ इदानीं ब्रह्मस्वरूपातिरिक्तं
धर्मादिवस्तुजातं किमपि नास्ति येन संबंधाद्यपेक्षा स्यादित्याह कर्तृ इति कर्तृ नाम कर्तृत्वं च कारो वार्थः
कर्म च कर्मरूपं वा यस्य स्फुरति तद्ब्रह्मैव कर्तृकर्मस्फुरणरूपत्वात् कर्तृकर्म ब्रह्म न जानाति स्वस्य वस्तुत्वादित्य
र्थः यस्य ब्रह्मणः कर्तृकर्म किमपि नास्ति तद्ब्रह्मरूपः अयमात्मैव स्फुटतरं वेदितव्यं ज्ञानं क्रियते उपक्रमते ॥१३॥

ग्रा॰ नि॰दी॰ १७

ननु तर्हि कर्तृत्व प्रत्ययस्य का गतिरित्यत आह कर्तृत्वादिकमिति कर्तृत्वादिकं कर्तृत्व भोक्तृत्वादिकं मन्माया
शक्त्यात्मनि प्रतिपद्यते निखिलं समग्रं इति केचिदाहुः केचिद्वादिन एवमाहुस्तेषामेषा कल्पना भ्रान्तिः कु
तः ब्रह्मातिरेकेण ब्रह्मव्यतिरिक्ततयान्यत् किमपि नास्ति एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किंचनेत्यादिश्रुतेः १४
एवमद्वैतात्म ब्रह्मज्ञाने सति सर्वं ज्ञानं भवतीत्याह तस्मिन्निति तस्मिन् श्रुतिप्रतिपाद्यतेऽद्वैते ब्रह्मणि विदिते

कर्तृत्वादिकमेतन्मायाशक्त्या प्रतिपद्यते निखिलं इति केचिदाहुरेषा भ्रान्तिर्ब्रह्मातिरेकेण नास्ति १४ तस्मिन्ब्रह्मणि विदिते विश्वमशेषमेव विदितं विदिते कारणमृदि विदितायां घटकरकाद्या यथावगम्यन्ते १५ तदिदं कारणमेकं विगतविशेषं विशुद्धचिद्रूपम् ॥

ज्ञाने सति विश्वं समस्तोऽपि प्रपञ्चः अशेषमनवशेषितं विदितं भवेत् तत्र दृष्टान्तः कारणमृदि घटादिकं प्रति कारणी
भूतायां मृत्तिकायां विदितायां घटकरकाद्या यथावगम्यन्ते घटकरकादीनि कार्याणि विदितानि मृन्मयत्वेन।
ज्ञातानि भवन्ति तद्वदित्यर्थः १५ इदानीं प्रतिपादितं कारणत्वेन यद्ब्रह्म न देवस्य विश्वस्य कारणं नान्यदित्या
ह तदिदमिति तदिदं ब्रह्म एकं कारणं कार्यभूतस्य प्रपञ्चस्य किंलक्षणं कारणं विगतविशेषं वि
शेषरहितं विशुद्धचिद्रूपं चैतन्यस्वभावं तस्मात् सदेकरूपात् असत्यनानात्वरहितात् ॥ १७

17

मायोपहृतत्वादशेषं सर्वमिदमिदमाकारेणानुभूयमानं विश्वं जगदभूत् जातमन्यवादिपरिकल्पितप्र
धानादिकारणं न भवतीत्यर्थः ७९ इदानीमसत्कारणवादिपक्षं निराकरोति कारणमिति कारणमसदि
ति केचिद्वादिनः कथयन्ति तन्न संभवति असतः कारणता न भवेत् तत्र दृष्टान्तः अङ्कुरजननी अङ्कुरीत्वा
दिका शक्तिर्वीजे सत्येव सद्रूपे वीजे विद्यमाने सकलैर्लोकैः समीक्ष्यतेऽवलोक्यते असति वीजे नावलो

तस्मात्सदेकरूपान्मायोपहितादभूदशेषमिदं ७९ कारणमस-
दिति केचित्कथयन्त्यसतो भवेन्न कारणता अङ्कुरजननी शक्तिः सति
खलु वीजे समीक्ष्यते सकलैः ८० कारणमदिति कथयन्त्वंध्यापुत्रेण
निर्वहेत्कार्यं किं च मृगतृष्णिकांभः पीत्वोदन्यां महीयसीं शमयेत् ८१

क्यत इत्यर्थः ८० पुनरप्यसत्कारणवादं निराकरोति कारणमिति कारणं प्रपंचस्यासदिति कथयन्
वादि वंध्यापुत्रेणाकारणीभूतेन कार्यं संतत्वमत्वादिरूपं निर्वहेत् साधयेत् किं च मृगतृष्णिकांभः
पीत्वोदन्यां तृषां महीयसीं महतीं शमयेत् नाशयेत् वंध्यापुत्रमरीचि
कानामसत्वान्न कार्याभाव इत्यर्थः ८१

ग्रा॰ नि॰ टी॰ १८

इदानीमसत्कारणमाह श्रुतियुक्तिभ्यामनुपपन्नत्वाह यस्मादिति यस्माच्छ्रुतियुक्त्या असत्कारणभास
त्वात् सोऽयं पूर्वोक्तवादः शास्त्रयुक्तिभ्यां न संभवति न घटते शास्त्रं सदेव सोम्येदमग्र आसीदिति यु।
क्तिः वंध्यापुत्रादिभ्यः कार्यानुत्पत्तिः तस्माद्यस्मादसत्कारणवादो न घटतेऽतः सदेव सत्स्वरूपमेव ततं
ब्रह्म सर्वेषां जगतां कारणं हेतुरुत्पत्तौ भवति ॥१९॥ ननु प्रपंचकारणं सद्रूपं ब्रह्मास्तु केऽद्वैतताहानिः स्यादिमांकां

यस्मान्नमोऽयमसतोवादः संभवति शास्त्रयुक्तिभ्यां तस्मात्सदेव तत
त्वं सर्वेषां कारणं भवति जगताम् ॥१९॥ जगदाकारतयापि
प्रथते गुरुशिष्यविग्रहतयापि ब्रह्माद्याकारतयापि प्रति।
भातीदं परात्परं तत्त्वम् ॥२०॥

तथामाह जगदाकारतयेति जगदाकारतयापि ब्रह्मैव प्रथते प्रसिद्धं गच्छति गुरुशिष्यवि
ग्रहतयापि गुरुशिष्यरूपेणापि तथा ब्रह्माद्याकारतयापि हिरण्यगर्भादि देवतारूपेणापि इदं
परात्परं तत्त्वं ब्रह्मस्वरूपं प्रतिभाति तत्तदाकारतया ब्रह्मैव विवर्त
रूपेणाभासत इत्यर्थः ॥२०॥

ने

इदानीं ब्रह्मैव जगद्विवर्तरूपेण भासते जगद्भिन्नं नास्तीत्युक्तं तत्र केषांचिदविवेकिनां जगत्सत्यं ब्रह्मणः भि-
न्नमिति भाने जन्ममरणपरंपरायै भवतीत्याह सत्यमिति सत्यं जगदिति भाने जगदपि ब्रह्मणः पृथक् सद्रू-
पमिति ज्ञानमपक्वचित्तानामद्वैतभावनारहितानां गुरुकरुणाविधुराणां संसृतये जन्ममरणपरंपरायै एव
स्याद्भवति यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुतेऽथ तस्य भयं भवतीति श्रुतेः तस्माद्भयकारणत्वहेतोः एतत-
दिदं निखिलं जगदसद्ब्रह्मणोऽभिन्नमिति निगमान्ताः उपनिषदः प्रतिपादयन्ति बोधयन्ति ८१ इदानीं विशु-

सत्यं जगदिति भाने संसृतये स्यादपक्वचित्तानाम् तस्मादसत्यमेतन्निखि-
लं प्रतिपादयन्ति निगमान्ताः ८१ परिपक्वमानसानां पुरुषवराणां पुरा।
तैस्तैः सुकृतैः ब्रह्मैवेदं सर्वं जगदिति भूयः प्रबोधयत्येषः ८२

द्धाधिकारिणां सर्वं ब्रह्मैवेति वेदः बोधयतीत्याह परिपक्वमानसानामिति परिपक्वमानसानां श्रवणम-
ननादिभिः स्थितप्रज्ञानां पुरुषवराणां उत्कृष्टाधिकारिणां पुरातनैः प्राचीनजन्मसंपादितैः सुकृतैः पुण्यभा-
रैर्हेतुभिः ब्रह्मात्मभावनायुक्तानामेष वेद उपनिषद्भागात्मकः सकलमेतज्जगद्ब्रह्मैवेति प्रतिबोधयति
भूयः बहुधा सर्वं खल्विदं ब्रह्मेति श्रुतेर्ब्रह्मातिरिक्तं सर्वं किंचिदपि नास्तीत्यर्थः ८२

नन्वहमिदं ब्रह्मैव भाति वेदान्ताश्च प्रतिपादयन्ति तर्हि सर्वेषां तथाज्ञानेनावभासत इत्यत आह अनवगतकां
चनानामिति अनवगतकांचनानां स्वर्णाज्ञानवतां हेमभूषणे स्वर्णपरिणामे भूषणेऽलंकारे भूषण
धीरलंकारबुद्धिरेव यथा स्वर्णानतिरिक्तेऽपि स्वर्णबुद्धिर्नास्ति एवं जगत्यस्मिंल्लोकेऽविवेकभाजां
तात्त्विकबुद्धिरहितानां जनानां मनुष्याणां तात्त्विकी ब्रह्मैवेदं सर्वमेवंरूपा धिषणा न भवतीत्य।

अनवगतकांचनानां भूषणधीरेव भूषणे हेम्नि एवमविवेकभाजां जगति
जनानां न तात्त्विकी धिषणा ८३ अहमालम्बनसिद्धं कस्य परोक्षं भवेदिदं ब्र॰
ह्म तदपि विचारविहीनैरपरोक्षयितुं न शक्यते मुग्धैः ८४

र्थः ८३ इदानीमेवमहमिदं ब्रह्मापरोक्षमेव सदविवेकिभिः परोक्षमेव प्रतीयत इत्याह अहमालम्बनसि
द्धमिति अहमालम्बनसिद्धमहमस्म्यहं जानामीत्येवंप्रकारकोऽनुभवस्तेन सिद्धं प्रसिद्धं सर्वमनुष्येषु
कस्य पुरुषस्येदं ब्रह्म परोक्षं भवेन्न कस्यापि तदप्येवमपरोक्षमपि श्रुतिविचारविहीनैः श्रुत्यर्थपरिशी
लनविमुखैः मुग्धैरज्ञानान्धैर्ब्रह्मापरोक्षयितुं साक्षात्कर्तुं न शक्यते वि
चारविहीनत्वादिति भावः ८४ ॥

इदानीं सर्वं ब्रह्मैव चेद्भवति नहि लौकिको वा शास्त्रीयो वा व्यवहारः लोकानां कथं संभवतीत्याह अहमि-
ति अहमिदमिति च मतिभ्यामहंशब्देनास्मत्प्रत्ययगोचरो विषयी इदंशब्देन युष्मत्प्रत्ययगोचरो विषयस्तदुभ-
यात्मके गृहीताभ्यामयं सर्वोऽपि लोकः सततं व्यवहरति स्वं स्वं व्यवहारं करोति नत्र बुद्धिद्वयस्य विषये विभजते
उत्तरार्द्धेन प्रथमेति प्रथमा ह्यमात्मिका बुद्धिः प्रतीचि प्रत्यगात्मनि वसति चरमा द्वितीया वपुरिन्द्रियादिवाह्येऽर्थे
स्थूलदेहादौ एवं विषयविषयिणोरितरेतराध्यासं कृत्वा सर्वोऽपि लोको व्यवहरतीति यथा चोक्तं सूत्रभाष्ये अ-

अहमिदमिति च मतिभ्यां सततं व्यवहरति सर्वलोकोऽपि प्र-
थमा प्रतीचि चरमा निवसति वपुरिन्द्रियादिवाह्येऽर्थे ८५ वपु-
रिन्द्रियादिविषयाहंबुद्धिस्तन्महत्तमो भ्रान्तिः अतस्मिंस्तद्बु-
द्धिरित्यध्यासत्वेन शास्त्रसमानत्वात् ८६ ॥

हमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहार इति ८५ इदानीं वाह्येऽर्थे स्थूलादौ याहंबुद्धिः सा भ्रान्तिरित्याह वपु-
रिन्द्रियादिविषयेति वपुरिन्द्रियादिविषया याऽहंबुद्धिः चेद्यदि भवति सा भ्रान्तिर्मोह एवाध्यास एव एवंबुद्धिः
अध्यासत्वे कुत इत्यत आह अतस्मिन्निति अतस्मिंस्तद्बुद्धिः अतत्प्रकारके ज्ञाने यथा रजतभिन्ने शुक्तिकादौ र-
जतबुद्धिः अध्यासो नाम अतस्मिंस्तद्बुद्धिरित्यध्यास इति भाष्ये ऽध्यासत्वेनाध्यासलक्षणत्वेन शास्त्रसमानत्वा-
न्निर्दिष्टत्वादित्यर्थः ८६ ॥

इदानीमहं त्वहेरिदं त्वहेत्यात्मन्यध्यस्तत्वादात्मैवाहंत्वहेरर्थ इत्याह तस्मादिति तस्माद्यतोऽहंकाराद्यात्म
न्यध्यस्तमतोऽशेषसाक्षी परमात्मैवाहमर्थः अहंप्रत्ययस्यार्थ इत्युचितं घटते जडवदेव चेतन इव ज्ञेयोप्यय
महंकारः तत्संबंधात् चेतनसंबंधाद्भवति ८७ इदानीमहंप्रत्ययस्यात्मैवार्थः नान्य इत्याह तस्मादिति त
स्मात्कारणात्सर्वशरीरेष्वहमहमित्येवाहमहंप्रकाररूपः यः प्रत्यक्तानं भासते स्पष्टः प्रकटो विशुद्धः केवलः

तस्मादशेषसाक्षी परमात्मैवाहमर्थ इत्युचितम् अजडवदेव ज्ञेयं तत्संबंधा
द्भवत्यहंकारः ८७ तस्मात्सर्वशरीरेष्वहमहमित्येव भासते स्पष्टः यः प्रत्ययो वि
शुद्धस्तस्य ब्रह्मैव भवति मुख्योऽर्थः ८८ गोशब्दादिव गोत्वं तदपि व्यक्तिः
प्रतीयतेऽर्थतया अहमर्थः परमात्मा तद्व्याप्त्या भवत्यहंकारः ८९

तस्याहंप्रत्ययस्य ब्रह्मैव मुख्योऽर्थः भवति न गौण इत्यर्थः ८८ इदानीं ब्रह्मैवाहंकारस्य मुख्योऽर्थ इति
यदुक्तं तदेव दृष्टान्तेन साधयति गोशब्दादिति गोशब्दात् गौरित्ययं शब्दस्तस्मात् गोशब्दाद्यथा गोत्वं सा
मान्यं यथा मुख्योऽर्थस्तदपि गोत्वमपि अर्थतया अर्थात्संबंधाद्व्यक्तिः प्रतीयते गवाकृतिस्तीयते न
द्वदेवमेवाहमर्थः मुख्यः परमात्मा आत्माहंकारोप्यहंप्रत्ययस्यार्थो
भवतीत्यर्थः ८९

इदानीमात्माहंकारोऽपि अहंप्रत्ययार्थी भवति तेन चाहंकारेऽपि कर्तृत्वादिधर्मारोपोऽपि भवतीत्याह दग्धत्वादि
कमिति दग्धत्वादिकं दाहकरणत्वं यथाऽयसः लोहस्य पावकसंयोगेन भवति वै निश्चयेय यद्वद्यथा तद्वत्तथा चेतन
संगादात्मसंबंधादहमित्यहंकारेऽपि कर्तृत्वादीनि कर्तृत्वाभोक्तृत्वादिकं प्रतिभाति भासतेऽध्यासादित्यर्थः ९०
तस्मादात्मैवाहमर्थ इत्येव निरंतरं विभावयेन्नान्यदित्याह देहेंद्रियादि दृश्यव्यतिरिक्तमिति देहेंद्रियादिदृश्य
व्यतिरिक्तं शरीरकरणविलक्षणं निर्मलमविद्यालेशरहितमतुलं साहृश्यरहितमद्वैतवर्जितं ब्रह्मसमर्थमहं ब्र

दग्धत्वादिकमयसः पावकसंयोगेन भासते यद्वत् तद्वच्चेतनसंगादहमिति प्रतिभा
ति कर्तृत्वादीनि ९० देहेंद्रियादिदृश्यव्यतिरिक्तं निर्मलमतुलमद्वैतं ब्रह्मसमर्थमि
ति विदित्वा तद्व्यतिरिक्तं न कल्पयेत्किंचित् ९१ यद्वत्सुखदुःखानामवयवभेदादनेक
ता देहे ।

मयगोचरं ब्रह्मैवाहमिति विदित्वा ज्ञात्वा तद्व्यतिरिक्तं ब्रह्मातिरिक्तं किंचिद्वस्तुजातं न कल्पयेन्न भावयेदित्यर्थः ९१
इदानीमात्माहंप्रत्ययगोचरत्वेन सर्वशरीरेष्वपि सम एव तथापि उपाधिभेदादात्मनोऽपि भेदेन भववैचित्र्यं भवती
त्याह यद्वदिति यद्वद्यथा सुखदुःखानां सुखदुःखप्रत्ययानामवयवभेदाद्धस्तपादाद्यंगभेदादेकस्मिन्नेव देहे शरी
रेऽनेकता भवति हस्ते मम सुखं हस्ते मम दुःखं शिरसि मम सुखं शिरसि मम दुःखमित्यादिप्रकारेण तद्वत्

प्रा॰ नि॰ टी॰ २१

तथा इह संसारे भेदे सत्यप्येषामात्मनामनुभववैचित्र्यं सदसदुभयात्मकं भिन्नमभिन्नमित्याद्यनुभववैलक्षण्यं भव
तीत्यर्थः ॥ १२ ॥ इदानीमेवमनुभववैचित्र्यं प्रपंचात्मकं भवति तस्य किं कारणं किंच रूपमित्यादि न केजालनकलितव्य
मायामयत्वादित्याह किमिदमिति किमिदं प्रपंचजालं किं भवति अस्य रूपं च किमिदं कथमभूत् कथं जातममुष्य
प्रपंचजालस्य को वा हेतुः किं कारणमितीत्यादि न कदापि चिंत्यं न चान्वेषणीयं धीमता ज्ञानिना किंतु मायेत्येवमा।

तद्वदिह सत्यभेदेऽप्यनुभववैचित्र्यमात्मनामेषां ॥ १२ ॥ किमिदं किमस्य रूपं कथमेतद
भूदमुष्य को हेतुः । इति न कदापि विचिंत्यं चिंत्यं मायेति धीमता विश्वं ॥ १३ ॥ दंतिनि दा
रुविकारे दारु तिरोभवति सोऽपि तत्रैव । जगति तथा परमात्मा परमात्मन्यपि जगत्ति
रोधत्ते ॥ १४ ॥

यामात्रमित्येवेदं विश्वं सर्वं प्रपंचजालं अधिष्ठानुभवतद्रूपेण स्फुरति विवर्तरूपेणेत्यर्थः ॥ १३ ॥ इदानीं दृष्टांतेनाभे
दं साधयन्नाह दंतिनीति दंतिनि गजे दारुविकारे काष्ठविकृतौ काष्ठे तिरोभवति अंतर्हितं भवति गजस्वरूपमे
व भाति न दारुरूपं सोऽपि दंत्यपि तत्रैव दारुण्येवांतर्भवति दारुरूपमेव भाति न गजस्वरूपं बालानां अज्ञानां च ग
जबुद्धिर्दारुबुद्धिश्चेति तथा जगति प्रपंचे परमात्मा तिरोभवत्यंतर्हितो भवति जगत्स्वरूपमेव भाति नात्मरूपं
तथा परमात्मन्यपि आत्मरूपे जगत्तिरोभवत्यात्मरूपमेव भाति न जगद्रूपमिति भावः ॥ १४ ॥ २१

इदानीमिदं मायामात्रं जगच्चित्रं कुत्र तिष्ठति केन वा स्थापितमित्याकांक्षायामाह आत्ममयेति आत्ममये आत्मस्व
रूपे महति व्यापके विस्तीर्णे पटे वस्त्रविशेषे विविधजगच्चित्रं नानारूपं जगल्लक्षणं चित्रं चित्रसदृशमात्मनैव लिखित
ं स्वेच्छातूलिकयेत्यर्थः इदं जगच्चित्रमात्मना स्वस्मिन्स्वयमेव लिखितं स्वयमेवात्मैव पश्यन् अवलोकयन् के
वलमवलोकयितृत्वरहितं प्रमदमानंदं परमात्मैव स्वयं प्रयाति प्राप्नोति यथा कश्चिल्लौकिकः चित्रकारपुरुषः
स्वयमेव चित्रमुल्लिख्य स्वकरतलादावसंतरमणीयमिति स्वयमेव पश्यन्नानंदं प्राप्नोति तद्वत् यथा चोक्तं योगि

आत्ममये महति पटे विविधजगच्चित्रमात्मना लिखितं स्वयमेव केवलम-
सौ पश्यन् प्रमदं प्रयाति परमात्मा ४८ चिन्मात्रममलमक्षयमद्वयमानंदम-
नुभवारूढं ब्रह्मैवास्ति तदन्यन्न किंचिदस्तीति निश्चयो विदुषाम् ४९

नोल्लसदये जगच्चित्रं समालिख्य स्वेच्छातूलिकयात्मनि स्वयमेव समालोक्य प्रीणाति भगवान् शिव इति ४८ इदा
नीं विद्वदनुभवप्रदर्शनेन संवेद्यस्यैव भातीत्याह चिन्मात्रमिति चिन्मात्रं चैतन्यस्वरूपं अमलं विशुद्धमक्षयमद्वय
मद्वयं द्वितीयरहितमानंदस्वरूपमनुभवारूढमनुभवैकवेद्यमेतल्लक्षणं ब्रह्मैवास्तीति तिष्ठति तदन्यदृश्यमानमत्र किंचि
दस्तीति विदुषां तत्त्वज्ञानिनां निश्चयः सिद्धांतः तथा चोक्तं वार्तिककारैः कदाचिद्व्यवहारे तु द्वैतं यद्यपि पश्यति
बोधात्मव्यतिरेकेण न पश्यति विदन्नयात् किंतु पश्यति मिथ्यैव दिङ्मोहेंदुविभागवदिति ४९ ।

नन्वब्रह्मातिरिक्तं किमपि न भाति चेद्विद्याविद्यादि श्रूयते विभागः तस्य का गतिरित्याशंकायामाह व्यवहारस्येति
व्यवहारस्य देशेऽयं व्यवहरणं व्यवहारः शास्त्रीयलौकिकादिकादिस्तत्संपादनार्थं विद्याविद्येति ज्ञानाज्ञानात्मिका
महामहती परिभाषा संज्ञा न तत्त्वदृष्ट्या ब्रह्मात्मैकत्वसिद्धांतदृष्ट्या नास्त्येव तत्त्वं यथार्थस्वरूपं ब्रह्मैवास्य स्मात् ब्रह्म
णः सकाशादन्यद्वस्त्वंतरं नास्ति नेह नानास्ति किंचनेत्यादिश्रुतेः १७ इदानीं ब्रह्मणोऽन्यादपि वस्त्वंतरमस्तीति म
तेऽपि अस्तित्वरूपेण ब्रह्मैवोच्यते वादिभिरित्याह अस्तीति अस्मान्यद्ब्रह्मणोऽन्यद्वस्त्वंतरमस्तीति मतं चेद्वादिनां तद

व्यवहारस्य देशेयं विद्याविद्येति वेदपरिभाषा नास्त्येव तत्त्वदृष्ट्या तत्त्वं ब्रह्मैव नान्यद
स्मात् १७ अस्त्यन्यदिति मतं चेत्तदपि ब्रह्मैव तदस्तितारूपं व्यतिरिक्तमस्तिता
या नास्ति तया शून्यमेव तत्सिद्धं १८ तत्त्वावबोधशक्त्या स्थिरतया वाधितापि सा
माया।

पि वस्त्वंतरमप्यस्तित्वरूपेण ब्रह्मैव भवति अस्तित्वं ब्रह्मणोऽन्यत्र नास्तीत्यर्थः तर्ह्यस्तित्व
व्यतिरिक्तं नास्तित्वरूपेणान्यद्वस्त्वंतरमस्तीति चेत्तत्राह व्यतिरिक्तमिति व्यतिरिक्तं भिन्नमस्तिता
या अस्तित्वरूपात्त्रास्ति तया नास्तित्वं शून्यमेव शून्यरूपत्वमेव तत्रास्तित्वं सिद्धं तदन्यवादिना
मेवमतमित्यर्थः १८ नन्वब्रह्मातिरिक्तं किमपि न भाति चेद्दृश्यशरीरव्यवहारः कथं सं
भवतीत्याकांक्षायामाह तत्त्वावबोधशक्त्येति तत्त्वावबोधशक्त्यात्मैकत्वज्ञानशक्त्या स्थिरतया।

विक्षेपादिरहितत्वेन बाधितापि सा माया मिथ्यात्वेन तिरस्कृतापि सा लोकप्रसिद्धशरीरव्यवहाररूपा माया आ
देहपातमरणावधि एषा विदुषो ब्रह्मनिष्ठानां मा भाति मिथ्यात्वेनाभासते आत्मापि निजः स्वस्वरूपो हृद्यानन्दस्व
स्वरूपेणाभाति प्रकाशते ११ ननु शरीरपातपर्यन्तं विदुषामविदुषां च समप्रपंच सप्रपंचभाने वैदुषां को विशे
ष इत्यत आह एष इति एष ग्रंथे विशेषो विदुषां ज्ञानिनां यत्प्रपंचेतोपि चक्षुरादीन्द्रियैर्व्यवहरंतोपि संततः प्रपंचसं
सारमायिकं व्यवहारमात्मनः पृथगात्माभिन्नं किंचित्किमपि न पश्येयुः सकलनिगमनिर्णीतान् सर्वोपनिष।

आदेहपातं सैषा माया भात्यात्मापि निजो विदुषां ११ एष विशेषो विदुषां पश्यन्तोऽपि
प्रपंचसंसारं पृथगात्मनो न किंचित्पश्येयुः सकलनिगमनिर्णीतान् १२ किंचित्किं
किमचिन्त्यं कथनीयं किमप्यकथनीयं किं कृत्यं किमकृत्यं निखिलं नादृतिं ज्ञान-
नो विदुषां १

हाकैर्निश्चितात्स्वात्मनः सकाशादन्यत्र भावयन्तीत्यर्थः १२ इदानीमेवमद्वैतवासनया स्थितानां ब्रह्मनिष्ठा
नां ज्ञानव्यक्ततत्वतादिदृश्यमिज्ञानेनास्तीत्याह किमिति किं किंचित्पदार्थजातं चिन्त्यं विचारणीयं किं किमप्यचि
न्तनीयमपि किमपि कथनीयं वियेयेषु किं किमप्यकथनीयं गोप्यमंतरहस्यमपि किं किंचित्कृत्यं कर्तव्यं
किं किमप्यकर्तव्यं वा नास्ति निखिलं सर्वं ब्रह्मेति विजानतां ज्ञानवतां विदुषां तत्त्वज्ञानावेहेन्द्रियाद्यभासा
भावादात्मकामत्वादिति श्रुतेः कामयमानोऽकामयमानो योऽकामो निष्काम आत्मकाम आप्तकाम इति श्रुतिम्

हं
ह

प्रा॰ इदानीं नाहंप्रत्ययानां तत्त्वज्ञानिनां वेद्यमोक्षादिव्यवहारोऽपि नास्तीत्याह निखिलमिति निखिलं सर्वं दृश्यवि
नि॰ टी॰ शेषमध्यारोपितपदार्थजातं दृग्रूपत्वेन दृष्टैतत्स्वस्वरूपत्वेन पश्यतामवलोकयतां विदुषां ज्ञानिनां न
२२ वेद्यः नापि मुक्तिः न च परमात्मत्वमीश्वरत्वं न वा जीवत्वं जीवस्वरूपत्वं वा किमस्तीति किमपि नास्तीत्यर्थः २ इदा
नीं यत्प्रतिपादितं ब्रह्मात्मैकत्वज्ञानं तदेव सर्वोपनिषदां तात्पर्यं प्रमाणभूतमित्याह प्रसक्तेति प्रसक्त

23

निखिलं दृश्यविशेषं दृग्रूपत्वेन पश्यतां विदुषां वेद्यो नापि न मुक्तिर्न च परमात्म
त्वमपि न जीवत्वं २ प्रसक्तुस्तु चिन्तितानामभ्याहततरनिजोपदेशानां प्रामाण्यप
रमसीम्ना निगमनमिदमेव निखिलनिगमानां २

दृढचिन्तितानां पुनः पुनर्विचारितानां भावनागोचरीकृतानां अभ्याहततरनिजोपदेशानां अभ्याहतो बोधि
तो निजोपदेशः स्वार्थः येषां तेषां निगमानां उपनिषद्वाक्यानां परमसीम्ना सकलप्रमाणावधिभूतानामिदमेव
यद्ब्रह्मात्मैकत्वं तदेव प्रामाण्यं निगमनं प्रतिज्ञाद्यवयवैः प्रतिपादितस्यार्थस्य तस्मात्तथेति वचनं निगमनं
सर्ववेदान्तसिद्धान्तोऽयमेवेत्यर्थः २ ॥

टी॰ १ जीवः परस्मात् भिद्यते इति प्रतिज्ञाऽऽदिपदेन हेतूदाहरणोपनययोर्ग्रहणं सच्चिदानन्दलक्षणत्वात् हेतुः अति
रेकी दृष्टान्तः यन्नैवं तन्नैवं यत्सच्चिदानन्दलक्षणं न भवति यथा घटः ॥

टी॰ २ पक्षे हेतूपसंहारः उपनयः पक्षे साध्योपसंहारो निगमनम् ॥

इदानीमेवविशिष्टेन ग्रन्थेन ब्रह्मनिष्ठेन देशिकेनात्मस्वरूपतां नीतः शिष्यः गुरुचरणसरोजेऽभिवन्द्य स्वानुभवात्स्वरूपं सर्वात्मकत्वं प्रमुदितमनोवाचाः विश्वकारैः प्राह इत्थमिति इत्थं निबोधितः एवं प्रकारेणोपदिष्टो गुरुणाचार्येण शिष्योऽधिकारी धन्यः प्रमुदितमनाः तद्गुरुपदयोश्चरणसरोजयोः प्रणम्य नमस्कारं कृत्वा स्वानुभवसिद्धमर्थं साक्षात्कृतब्रह्मस्वरूपतालक्षणं स्वयमेवान्तर्बुद्ध्या विचारयामास मननगोचरीकृतवानित्यर्थः ४ इदानीं स्वस्य सर्वात्मकत्वं प्रकटयति अजरोऽहमिति अजरोऽहं जन्मरहितः अनपवान्तरः विकृतिरहितः प्राज्ञः ईश्वरः प्रत्यगात्मबोध :

इत्थं निबोध्य गुरुणा शिष्योऽहं धन्यतामपद्योः स्वानुभवसिद्धमर्थं स्वयमेवान्तर्विचारयामास ४ अजरोऽहमक्षरोऽहं प्राज्ञोऽहं प्रत्यगात्मबोधोऽहं परमानन्दमयोऽहं परमशिवोऽहं भवामि परिपूर्णः ५ आप्तोऽहमात्मभाजामात्मानन्दानुभूतिरसिकोऽहं आबालगोपमखिलैरहमित्यनुभूयमानमहिमाऽहम् ६

प्रतिव्यक्ति शुद्धप्रकाशकज्ञानरूपः परमानन्दमयः आनन्दप्रचुरः परमशिवः सकलनिदानरूपः शिवमयोऽहं भवामि अहमिति प्रत्येकं योजनीयं अहमजोऽहमक्षर इत्यादि ५ आप्तोऽहमिति अहमात्मभाजामात्मज्ञानवताम् आप्ते आप्तोऽस्मि संपन्नोऽस्मि अहमानन्दानुभूतिरसिकः ब्रह्मानन्दानुभवरसज्ञः आबालगोपं बालगोपालमर्यादीकृत्य आबालगोपं अखिलैर्मानवैरहमनुभूयमानमहिमाऽहमित्यनुभूयमानं महत्त्वं यस्य तादृशोऽहमेवास्मीत्यर्थः ६ ।

टीप· आचिनोति हि शास्त्रार्थमाचारे स्थापयत्यपि स्वयमाचरते यस्मादाचार्यस्तेन सोच्यते १

इन्द्रियेति इन्द्रियसुखविमुखः विषयाभिमुखसुखरहितः निजसुखबोधानुभूतिभूषितः आत्मसुखानुभवपरिश
ीलः इतिमतिहरणतरः एवंप्रकारस्त्वात्मा इत्याकारतायां मतिः बुद्धिस्तस्याः हरणतरः अप्राप्य अपि च भावेतरस्खलि
तचित्तः भावाः पदार्थाः विषयास्तेभ्यो विषयादिसुखेभ्यः इतरे भिन्नस्वत्वेन नश्वरत्वेन सुखस्वरूपतो गतं चित्तं
यस्मात् तं सोऽहमेव अहंपदे सर्वेष्वन्वयेनैकयोजनीयम् ७ ईशोऽहमिति ईशः परमसामर्थ्यवान् ईश्वराणां कर्त्तृ
मकर्तृसमर्थानामपि ईशः ईर्ष्याद्वेषानुषङ्गरहितः रागद्वेषादिसंबंधरहितः ईक्षणविषयमतीनां आत्मस्व

इन्द्रियसुखविमुखोऽहं निजसुखबोधानुभूतिरहितोऽहं इतिमतिहरणतरोऽहं भावे
तरस्खलितचित्तोऽहं ७ ईशोऽहमीश्वराणामीर्ष्याद्वेषानुषङ्गरहितोऽहं ईक्षणविष
यमतीनामीप्सितपुरुषार्थसाधनपरोऽहं ८ उदयोऽहमेव जगतामुपनिषदुद्या
नकृतविहारोऽहं उद्वेलशोकसागरवाडवहुतवाहनार्चिरहम् ९ ।

रूपावलोकनरूपो यो विषयस्तस्मिन्मतिर्येषां तेषां मध्ये ईप्सितपुरुषार्थसाधनपरः अभिलषितो यो च
रमपुरुषार्थः तत्साधनतत्परः अहमेव ८ उदयोऽहमिति जगतामुदयः उत्पत्तिस्थितिलयवतामुद
यः प्रकाशः उपनिषदुद्यानकृतविहारः उपनिषद्रूपउद्यानं वनं तस्मिन्कृतविहारं तदर्थपरिशी
लनपरः उद्वेलशोकसागरवाडवहुतवाहनार्चिः उद्वेलो ह्युद्गततोयः शोकसागरः कामानवाप्तिल
क्षणो जलधिः तस्य शोषणे वडवानलार्चिः वडवानलरूपतेजः अहमेव ९

ऊर्जस्वलनिजविभवैरिति ऊर्जस्वला अत्यंततेजोमया ये निजविभावाः स्वविभूतयस्ताभिरूर्ध्वमुपरिस्थ्यः अधो
भागतिर्यक् सर्वदिक्कोणेषु अभ्युवाणो ध्यामध्यान् ऊहापोहविचारैः ऊहस्तर्कः अपोहस्तर्कनिराकरणं ताभ्यां विचारा
स्तैरूरीकृतवान् अंगीकृतः स्वप्रतीयमानोऽहमेव १ ऋषिरहमिति ऋषिरहं ऋषिरतीतानागतवर्तमानद्रष्टा ऋषि
गणाः सप्तर्षिसमूहः सृष्टिसर्गः सृज्यमानं सकलभूतसंघः ऋद्धिः समृद्धिः वृद्धिः ह्रासाभावः इष्टिः सर्वकामावाप्तिः

ऊर्जस्वलनिजविभवैरूर्ध्वमधस्तिर्यगभ्युवानोऽहं ऊहापोहविचारैरूरीकृतवत्प्र
तीयमानोऽहम् १ ऋषिरहमृषिगणोऽहं सृष्टिरहं सृज्यमानमहमेव ऋद्धिर
हं वृद्धिरहमिष्टिरहमिष्टिदीप्तिरहम् ॥ एकोऽहमेतदीदृशमेवमिति ।
स्फुरितभेदरहितोऽहम् यद्भावोऽहमनीदृशोऽन्तःसंकुचितभूतिरहितोऽहं १२
एकावभासकोऽहं वाक्परिज्ञानपावनमतीनाम् ॥

इष्टिदीप्तिः सर्वकामावाप्तिलक्षणो यो दीपस्तस्य दीप्तिः प्रभाप्रसरः अहमेव ॥ एक इति एकः सर्वभे
दरहितः एतदिदमीदृशमेतत्प्रकारमेवमित्यभिलापादियत्स्फुरितैर्मनसः कल्पनाजालेन भेदरहितः अहमे
व अनीदृशः कल्पनाबहिर्हितैः यद्भावः यतो भवजनीयः अंतः संकुचितभूतिरहितः अंतः अंतःकरणसंकुचितभू
तिः अणिमाद्यमेवंलक्षणात्तद्रहितः अहमेव १२ एकावभासक इति एकावभासकः एकं एकत्वं तस्यावभासकः

श्रा॰
नि॰ टी॰
२५

प्रकाशकः वाक्यार्थज्ञानपावनमतीनां महावाक्योत्थं यत्परिज्ञानं ब्रह्मस्वरूपभावबोधः तेन पावनाविशुद्धा मतिर्येषां ते
षां पेशमहमेव तत्त्वस्वभावस्वरूपे नैशातमः आद्यमोहमिहिरः निशासंबंधि यत्तमः अज्ञानांधकारस्तन्नाशः तस्य हृशो
योमोहः अज्ञानं तस्योच्छेदकमिहिरः सहस्रभानुः अहमेव १३ ओजोहमिति औषधीनामोजः सर्वासामोषधीनां तेजः
ओतप्रोतायमानभुवनः आयतायामरूपेणाभ्यासानि भुवनानि येन सोऽहमोंकारसारसोल्लसदात्मसुखामोदमत्तभृंगो

पेशमहमेव तत्त्वनैशातमः आद्यमोहमिहिरोऽहम् १३ ओजोऽहमौषधीनामोत-
प्रोतायभुवनोऽहम् ओंकारसारसोल्लसदात्मसुखामोदमत्तभृंगोऽहं १४
औषधमहमशुभानामौपाधिकधर्मजालरहितोऽहम् औदार्याति-
शयोऽहं चित्तविविधचतुर्वर्गतरणपरोऽहम् १५

हे ओंकारएव सारः सं कमले तस्मादुल्लसन्यः आत्मसुखामोदः बोधलक्षणः तेन मत्तो विस्मृताहंकृतिरहमेव १४ औ
षधमिति अशुभानां पापरूपाणामौषधमुन्मूलनकरमहमेव औपाधिकधर्मजालरहितोऽहं उपाधिकृतसविधोत्पादि
तेयद्धर्मजालप्रपंचलक्षणं तद्रहितश्चाहमेव औदार्यातिशयः दानातिशयः चित्तविविधचतुर्वर्गतरणपरः मनःकल्पितच
तुःप्रकारकोयस्तु वर्गः धर्मादिपुरुषार्थसमूहः तस्य यत्तरणं संपादनं तत्परः तत्साधनपरोऽहमेवेत्यर्थः १५ २५

अखण्डमिति महत्तया मत्तवारणेन्द्राणामहमखण्डः महत्तया वयं महान्त इति महत्त्वेनोत्कृष्टत्वेन मत्ता मदोन्मत्ता ये
वारणेन्द्रा ऐरावतगजधौरेया इव तेषामखिलानां समस्तानामखण्डस्तेषामशेषहारकः अम्बरमिवाकाशमिव विमलोऽहं शं
वरिपुरिवशिवा इव जातायाः विकृतिः विकारस्तेन रहितः अहमेव १६ आत्मविकल्पमतीनामिति आत्मनि आत्म-
विषये विकल्पमतीनामात्माहं भवामि वा न भवामि वेति विकल्पबुद्धीनां अस्खलदुपदेशागम्यमानः अस्खलनमच

अखण्डोऽहमखिलानां महत्तया मत्तवारणेन्द्राणां अम्बरमिव विमलोऽहं शंवरि
पुरि व जातविकृतिरहितोऽहं १६ आत्मविकल्पमतीनामस्खलदुपदेशागम्य-
मानोऽहं अस्थिरस्त्रवविभ्रवोऽहमस्थिरस्त्रववायं सपङ्कचितोऽहम् १७ करु-
णारसभरितोऽहं कवलितकमलासनादिलोकोऽहं कलुषाहंकारविलसिता-
णोऽहं कल्मषसंकृतोपलेशरहितोऽहं १८

लनं निश्चितो यो उपदेशस्तेनागम्यमानो बुध्यमा
नो: स्थिरस्त्रवविभ्रवः अस्थिरं चलं यद्विषयसंस्रवं तद्रहितः स्त्रववायसपङ्कचितः स्त्रवत्रुपायो तोयः ज्ञानं तस्य या
सपत्नस्तद्रहितस्तद्वचितो योगपः अहमेव १७ करुणारसेति करुणारसभरितः कृपामृतपूर्णः कवलितकमलास
नादिलोकः कवलितः ग्रासः कमलासनादिलोकः ब्रह्मलोकः अहमेव कलुषाहंकारविलसितेण मलिनाहंकृ
तिरहितः कल्मषसंकृतोपलेशरहितः कल्मषं पापं संकृतं पुण्यं तदुभयोपलेशः संसर्गः तद्रहितः अहमेव १८

आ. नि. टी. २९

खानामिति खानामिंद्रियाणामगोचरोऽविषयः खातीत इंद्रियातीतः आकाशादिभूतातीतो वा खपुष्पभवगः आ
काशपुष्पप्रायो यो भवः संसारस्तस्मिन्वर्तमानः अहमेव १९ गलितेति गलितोऽहमनीहः अनीहः फलाशारहितः गु
णः शाप्यः गत्यागत्यरहितपूर्णबोधः उत्पत्तिविनाशरहितो यः पूर्णबोधः आत्मस्वरूपलक्षणः अहमेव २० घनतरे
ति घनतरः निबिडतरो यो मोहः स एव तिमिरमंधकारस्तस्य यः प्रकरः व्याप्तिस्तस्य प्रध्वंसनः नाशकः यः भानुनिकरः

खानामगोचरोऽहं खातीतोऽहं खपुष्पभवगोऽहं खलजनदुर्गमदोऽहं खंडज्ञानोपरतोऽ
नपरोऽहं १९ गलितद्वैतकथोऽहं दरीभवदखिलमूलहृदयोऽहं गलितोऽहमनीहोऽहं ग
त्यागतिरहितपूर्णबोधोऽहं २० घनतरमोहतिमिरप्रकरप्रध्वंसनभानुनिकरोऽहं
घटिकावासररजनीसंवत्सरयुगकल्पकालभेदोऽहं २१ चरदचरात्मकोऽहं चलतरम
तिसाध्यचरितोऽहं चपलजनदुर्गमोऽहं चलभवजलधिपारदेशोऽहं २२

किरणसमूहः।

घटिकावासररजनीसंवत्सरयुगकल्पकालभेदः घटिकादिकल्पांतो यः कालभेदः सोऽहमेव २१ चरदचरात्मक इति
चरदचरात्मकः स्थावरजंगमात्मकः चलतरमतिसाध्यचरितः नैपुण्यबुद्धिभिः साध्यचरितः लब्धाचरणः चपलजनदु
र्गमः चपलजनाः विषयचपला ये जनास्तैर्दुर्गमो दुरापः चलभवजलधिपारदेशः अस्थिरसंसारवारिधेः यः पारदेशः ब्रह्म
लक्षणः सोऽहमेव २२ २९

छंदःसिंधुनिगूढेति छंदो वेदः स एव सिंधुः महोदधिः तस्मिन्निगूढं गुप्तं यज्ज्ञानं सुखं तस्माज्जातो य आल्हादः तेन मोद
मानः प्रमुदितः छलपदविहितमतीनां छलेन नामसज्जयार्थमन्यथार्थकल्पने न च केवलवाक्स्थाणोरस्मिन्नर्थे यो यथा
र्थकल्पने तस्य यत्पदं तत्र विहिता निवेशिता मतिर्येषां तेषां छेत्रोरज्ञातः शांतिमार्गगम्यः दुस्तर्कादिरहितो यो मा
र्गः संप्रदायस्तेन गम्यः प्राप्योऽहमेव २३ जलजासनादीति जलजासनो ब्रह्मा स आदिर्येषां तेषां ब्रह्मविष्णुमहेशानि

छंदःसिंधुनिगूढज्ञानसुखाल्हादमोदमानोहं छलपदविहितमतीनां छेत्रा
हं शांतिमार्गगम्योहं २३ जलजासनादिगोचरपंचमहाभूतमूलभूतोहं जगदानं
दकरोहं जन्मजरारोगमरणरहितोहम् २४ उंकृतिझंकृतिसिंजनबृंहितसुख
विविधनादभेदोहं कटितिघटितात्मवेदनदीपपरिस्फुरितहृदयभवनोहं २५

गोचरीभूता आकाशादिपंचमहाभूतानां मूलभूतः प्ररोहस्थानं जगदानंदकरो जगति लोकत्रये आनंदकरः सुखदाता ज
न्मजरारोगरहितः षड्भावविकाररहितः अहमेव २४ उंकृतिझंकृतिसिंजितबृंहितसुखविविधनादभेदोहमिति उंकृ
तिः कांस्यतालादिध्वनिः झंकृतिः रणवीरध्वनिः सिंजितं भूषणध्वनिः बृंहितं करीणां ध्वनिः एते शब्दाः सुखाः सुखदाः एता
दृशा ये विविधाः नादभेदाः ध्वनिविकारास्तत्स्वरूपः कटितिघटिकात्मवेदनदीपपरिस्फुरितहृदयभवनः कटिति।

आ०
नि० टी०
२७

त्रिप्रघटितः कृतः आत्मवेदनदीपः आत्मज्ञानलक्षणो दीपः प्रकाशस्तेन परिस्फुरितं प्रकाशितं हृदयभवनं हृदय
पुण्डरीकं सोऽहमेव २५ ज्ञानमिति ज्ञानं पदार्थग्राहकावृत्तिः ज्ञेयं ज्ञानविषयः ज्ञाताहं निःहाराविषयज्ञानवान् ज्ञान
साधनगणं इन्द्रियसमूहः ज्ञातृज्ञानविनाकृतमस्तित्वं ज्ञातृत्वादित्रितयरहितमस्तित्वमात्रमहमेव २६ तत्त्वातीत
पद इति तत्त्वातीतपदः तत्त्वानि चतुर्विंशतिस्तेभ्योऽतीतपदः तद्रहितस्वरूपः तं दन्तरग्रहमस्मि इति तत्त्वान्तरेऽह

ज्ञानमहं ज्ञेयमहं ज्ञाताहं ज्ञानसाधनगणोऽहं ज्ञातृज्ञानविनाकृतमस्ति
त्वमात्रमेवाहम् २६ तत्त्वातीतपदोऽहं तदन्तरोऽहमस्मीति भावरहितोऽहं
नामसङ्करपरिगमोऽहं तत्त्वंपदबोधवीथ्यहृदयोऽहम् २७ देवतदै
त्यनिशाचरमानवतिर्यग्स्वप्नपरादिरहम् देहेन्द्रियरहितोऽहं द।
त्तिणपूर्वादिदिग्विभागोऽहम् २८

मस्मीति यस्तत्त्वमध्येयो भावः अभिप्रायः तद्रहितः
नामसङ्करपरिगमः नामसाम्यमोऽहनयुस्तैर्ड्रपरिगमः ड्राप्तः तत्त्वंपदबोधवीथ्यहृदयः तत्त्वंपदयोर्यो बोधः ऐक्यात्म
लक्षणज्ञानं तेन बोध्यबोधनीयं हृदयमन्तःकरणं यस्यासः सोऽहमेव २७ देवतदैत्यनिशाचरमानवतिर्यग्स्वप्नपरादीनि
देवदैत्यनिशाचरमानवतिर्यग्स्वप्नपरादिप्रसिद्धानामेतेषामादिः देहेन्द्रियरहितस्तद्भिन्नः दक्षिणपूर्वादिदिग्विभागः २७
सर्वादिदिग्विभागस्वरूपोऽहमेव २८

धर्माधर्ममय इति धर्माधर्ममयो भवस्वरूपः धर्माधर्मादिद्वंद्वरहितः धर्माधर्मो शुभमयवधविलक्षणः धार्मिकजनसु
लभः धार्मिकाः स्वधर्मशीलाः तेषां सुलभः धन्योहं श्लाघ्योहं धातृणादिशून्यः धातृब्रह्माणः आदिशून्यः कारणमहमेव २९
नामादिविरहित इति नामादिविरहितः अभिधानादिरहितः नरकस्वर्गापवर्गरहितः निषिद्धकाम्यनित्यादिकर्मा भा
वाद्विविधगतिरहितः नादांतरवेदितः अनाहतनादादिप्राप्तित्वेन योगिभिर्ज्ञातः नानाविधनिखिलागमसारः

धर्माधर्ममयोहं धर्माधर्मादिद्वंद्वरहितोहम् धार्मिकजनसुलभोहं धन्योहं
धातृणादिशून्योहं २९ नामादिविरहितोहं नरकस्वर्गापवर्गरहितोहं नादांतरवे
दितोहं नानाविधनिखिलागमसारोहं ३० परजीवभेदबाधकपरमार्थज्ञान
स्फुरद्वितोहं प्रकृतिरहं विकृतिरहं परिणतिरहमस्मि भागधेयानाम् ३१

नानाबहुप्रकारं यद्विश्वं निखिलाः ये आगमा वेदाः तेषां सारो रसभूतोहमेव ३० परजीवभेदबाधकपरमार्थज्ञा
नस्फुरद्वित इति परः ईश्वरः जीवः शरीरी तयोर्यो भेदस्तस्य बाधके यज्ज्ञानं परमार्थज्ञानं ब्रह्मैकत्वज्ञानं तेन स्फुरद्वि
तः प्रकृतिरिति मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्तेति सांख्ये विकृतिर्महदादिसप्तकं भाग
धेयानां भाग्यानां च परिणतिः परिणामः अहमेव ३१

स्त्रा॰ फणधरभूधरधारणविग्रहविस्तृतप्रपंचसार इति फणधरादीनां ये विग्रहास्तैर्विस्तृतो यः प्रपंचस्तस्य सारः भालत
नि॰टी॰ लोहितलोचनपावकपरिभूतपंचबाणोऽहमेव सोऽहं १२ बद्ध इति अहं बद्धो न भवामि पाशाष्टकेन बद्धो न घृणालज्जा
२८ भयशंकाजुगुप्सा चेति पंचमी कुलं शीलं च जातिश्चाष्टौ पाशाः प्रकीर्तिताः पाशबद्धः स्मृतो जीवः पाशमुक्तः सदा
शिव इति नं रोक्तपाशाः अत एव यथा मुक्तोपि न भवामि बोध्यः तत्तत्साक्षात्कारेण न भवामि बोध्यो न भवामि इति ज्ञा

फणधरभूधरधारणविग्रहविस्तृतप्रपंचसारोऽहं भाललोहितलोचनपावकपरिभू-
तपंचबाणोऽहं १२ बद्धो भवामि नाहं च यथा मुक्तस्तथापि नैवाहं बोध्यो भवा-
मि नाहं बोधोऽहं नैव बोधको नाहं १३ भक्तिरहं भजनमहं मुक्तिरहं मुक्तियु-
क्तिरहमेव भूतानुशासनोऽहं भूतभवद्भव्यमूलभूतोऽहं १४

नेन बोधकः बोधकर्तापि न भवाम्यहं १३ भक्तिरिति भक्तिः भगवद्रूपासक्तिः तदुक्तं भक्तिरसायने द्रुतस्य भगवद्धर्माद्धा
रावाहिकतां गता सर्वेशे मनसो वृत्तिः भक्तिरित्यभिधीयते इति भजनमर्चनादिभिरुपासनं मुक्तिर्ब्रह्मानंदावा
प्तिरविद्यानिवृत्तिलक्षणा मुक्तियुक्तिर्मुक्तिबोधनप्रकारः भूतानुशासनः सर्वेषां भूतानां शिक्षकः भूतभव्य
भवन्मूलभूतः जातजायमानजनिष्यमाणस्य प्रपंचस्य मूलभूतः कारणमहमेव १४ २८

मान्य इति मान्यः पूज्यः महतां मान्यानामपि मंदमतीनाममाननीयः अज्ञानिनामसंभावनीयः मदरागमानमो
हितमानसदुर्वासनादूरगपः मदादिदोषैर्मोहितं यन्मानसं तस्य या दुर्वासना तया दूरगो यः सोऽहमेव २५ यजनयज
मानयाजकयागमय इति यजनं समंत्रकहविःप्रक्षेपणादिक्रिया यजमानो यज्ञकर्ता याजकाः ऋत्विजः यागो दे
वतोद्देशेनाहवनीयादौ होमादिप्रदानं तन्मयः तद्रूपः इत्यर्थः यमादिरहितः अष्टांगसाधनरहितः इंद्रयमव

मान्योऽहमस्मि महतां मंदमतीनाममाननीयोऽहं मदरागमानमोहितमानसदु।
र्वासनादूरगोऽहं २५ यजनयजमानयाजकयागमयोऽहं यमादिरहितोऽहं इंद्रयमव
रुणायक्षराक्षसमरुदेशवह्निरूपोऽहं २६ रक्षाविधानशिक्षावीक्षितलीलावलोकम
हिमाऽहं रजनिदिवसविरामस्फुरदनुभूतिप्रमाणसिद्धोऽहं २७ लक्षणलक्ष्यमयोऽहं
लाक्षणिकोऽहं लयादिरहितोऽहं लाभालाभमयोऽहं लब्धव्यानामलभ्यमानोऽहं २८।

रुणायक्षराक्षसमरुदीशवह्निरूपः दशदिगीशस्वरूपोऽहमेव २६ रक्षेति रक्षा जगद्रक्षणं तस्य विधानं कर्तव्य
तानस्य शिक्षा तस्या वीक्षितलीलावलोकस्य महिमा रजनीदिवसविरामस्फुरदनुभूतिप्रमाणसिद्धः रात्रि
दिवसयोर्विरामोऽभावस्तस्मिन्या स्फुरद्रूपानुभूतिरनुभवः स एव प्रमाणं तेन सिद्धोऽहमेव २७ लक्षण इति लक्षण
लक्ष्योभयमयः लाक्षणिकः लक्षणागम्योऽर्थः लयादिरहितः लयविक्षेपकषायैरहितः लाभालाभमय उभय
रूपः लब्धव्यानां प्राप्तव्यानामप्यलभ्यमानः अप्राप्यमानः अहमेव २८

वर्णाश्रमरहितइति वर्णाश्रमोभयरहितः वर्णमयः मातृकामयः वरेण्यगण्यः वरेण्येषुगण्यमान्यः वाचामगोचरः
परादीनामविषयः वचसांवाक्यानामर्थेपदेचनिविष्टः अर्थरूपेणप्रविष्टः अहमेव ३९ शमदमविरहितमनसामि।
ति शमदमादिसाधनविरहितमनसांपुरुषाणांशास्त्रशतैरपि अनेकशास्त्रावगाहनैरपि अगम्यमानोऽप्राप्यः विदु।
षांज्ञानिनांशरणंस्थानं शकलीकृतविविधसंशयगणः छिन्नःअनेकप्रकारकोयः संशयगणः संदेहसमूहोऽ
हमेव ४० षड्भावविरहितइति षड्भावविरहितअस्तीत्यादिशरीरधर्मरहितः मधुरादिषड्गुणरहितः अहित

वर्णाश्रमरहितोहं वर्णमयोहं वरेण्यगण्योहं वाचामगोचरोहं वचसामर्थेपदेनिविष्टो
हं ३९ शमदमविरहितमनसां शास्त्रशतैरप्यगम्यमानोहं शरणमहमेव विदुषांश
कलीकृतविविधसंशयगणोहं ४० षड्भावविरहितोहं षड्गुणरहितोमहितरहि
तोहं षट्कोशविरहितोहं षट्त्रिंशत्तत्त्वजालरहितोहम् ४१

रहितोहं स्वस्यानिष्टरहितः षट्कोशविरहितः पितृजकोशत्रयंमातृजकोशत्रयंतद्विरहितः पितृभ्यामशितान्नाद्दत्ता
त् षट्कोशंजायतेवपुः स्नायवोऽस्थीनिमज्जाचजायन्तेपितृतस्तथा त्वङ्मांसशोणितमितिमातृतश्चभवन्तिहीति।
शिवगीतायामुक्तकोशषट्कं षट्त्रिंशत्तत्त्वजालरहितः षट्त्रिंशत्तत्त्वानि शैवागमेभूतपंचकंप्राणपंचकं इन्द्रिया
णिचत्वारि दशमहाकालः प्रधानंमायाविद्यापुरुषः बिन्दुनादः शक्तिशिवःशान्तातीताइति ४१

टीप-३ नाडीग्रन्थान्तरगतस्नेहः॥

संवित्सुखात्मक इति संवित्सुखात्मकः ज्ञानसुखमयः समाधिसंकल्पकल्पवृक्षः समाधिश्च संकल्पश्च तयोः कल्पवृक्षः संसारविरहितः संसारातीतः आत्मविद्यायाः साक्षात्कारः ब्रह्मविद्यायाः साक्षादनुभवः ४२ ब्रह्मेति ब्रह्म ब्रह्मविरिञ्चिः देवता ईश्वरः कश्च क इत्यागमे ईश्वरः हेयोपादेयभावशून्यः हेयं त्याज्यमुपादेयं ग्राह्यं तदुभयभावशून्यः हरिर्विष्णुः हरः शिवः विधिर्ब्रह्मा एतेषां त्रयाणां कारणमहमेव ४३ क्षालितकल्मषमय इति क्षालितकल्मषम

संवित्सुखात्मकोऽहं समाधिसंकल्पकल्पवृक्षोऽहं संसारविरहितोऽहं साक्षात्कारोऽहमा
त्मविद्यायाः ४२ ब्रह्माहं कश्चाहं हेयोपादेयभावशून्योऽहं हरिरहमस्मि हरोऽहं वि
धिरहमेवास्मि कारणं तेषां ४३ क्षालितकल्मषमयोऽहं क्षपितभवक्लेशजालहृद
योऽहं ज्ञानाद्यन्तरसहितो विविधव्यवहारमूलमहमेव ४४ बहुभिः किमेभिरुक्तैर
हमेवेदं चराचरं विश्वं सीकरफेनतरंगाः सिन्धोरपराणि न खलु वस्तूनि ४५ ।

यः क्षालितं धौतं कल्मषं पापमेनोंऽहश्च यस्य तद्रूपं तन्मयः क्षपितभवक्लेशजालहृदयः क्षीणीकृतसंसारकष्टजालान्तःकरणः ज्ञानाद्यन्तरसहितः अकारादिक्षकारान्तवर्णात्मकः विविधव्यवहारमूलं नानाप्रकारकशास्त्रीयलौकिकव्यवहारस्य मूलकारणमहमेव ४४ बहुभिरिति एभिः बहुभिरुक्तैः किं विविधप्रकाररूपोऽहमिति भाषणैः किं किं प्रयोजनं व्यष्टिरूपेण समष्टिरूपेण अहं इदं चराचरं विश्वं अहमेव सर्वोऽपि प्रपंचोऽहमेव वस्तुतया भावात् तत्र दृष्टान्तः सीकरफेनतरंगाः सिन्धोरपराणि न खलु वस्तूनि यथा सीकरादीनां समुद्ररूपशरीरं न हि भिन्नमित्यर्थः ४५

श्रा०
नि० टी०
१०

30

शरणमिति शरणं रक्षणं जननी मम न हि भवति पिता रक्षणं न सुताः पुत्रा अपि न सोदरा भ्रातरोऽपि न अमे संवेपि
नीति मम शरणं न रक्षणे पर्याप्ता न भवंति तर्हि किं शरणमित्याह परममिति परमम् उत्कृष्टं शरणं रक्षणं मम मूर्ध्नि म
स्तके देशिकरूपस्य श्रीगुरुभिर्न्यस्तस्य आपितं चरणपदयुगमेव शरणं नान्यदित्यर्थः ४९ आस्तामिति आस्तां तिष्ठति
दैशिकचरण श्रीगुरुचरणसरोजहृदयमूर्ध्नि निरवधि निःसीम तदीक्षणे श्रीगुरुचरणेक्षणेऽवलोकने करुणाकृ

शरणं न हि मम जननी न पिता न सुता न सोदरा नान्ये परमं शरणमिदमेव चर
णमम मूर्ध्नि दैशिकन्यस्तम् ४९ आस्तां दैशिकचरणं निरवधिरास्तां तदीक्षणे।
करुणा आस्तां किमपि तदुक्तं किमतः परमस्ति जन्मसाफल्यम् ५० हि
मकरकरसारसान्द्राः कान्तिनवरदानकल्पविशेषाः श्रीगुरुचरणकटा
क्षाः शिशिराः शमयन्ति चित्तसन्तापं ५१

पास्तां अथ च तदुक्तं किं श्रीगुरुभिरुपदिष्टं ज्ञानं हृदयेऽस्तु यथा हरणीयं किमप्यास्तां तस्मात् जन्मसाफल्यं सफलं किं जन्म
न इदमेव फलं यदुक्तं ५० हिमकरकरसान्द्रा इति हिमकरश्चन्द्रः तस्य किरणानां यः सारोऽमृतद्रवः तद्वत्सान्द्राः निबिडाः
कान्तिनवरदानकल्पविशेषः स्वेष्टवरदानेकल्पाः समर्थाः एतेऽपि विशेषाः विशिष्टाः एतादृशाः श्रीगुरुचरणक
टाक्षाः गुरुकरुणापाङ्गाः शिशिराः शीतलाः चित्तसन्तापं त्रिविधतापं शमयंति दूरीकुर्वंति आनंदयन्तीत्यर्थः ५१ १०

कवलितंचंचलचेतइति कवलितोग्रसितोयश्चंचलश्चेतोलक्षणोयोगुरुतरोऽत्यंतगुरुर्मेरुकः मेकः तेनजातपरि
तोषासंतुष्टाएतादृशीचिन्मयीचैतन्यरूपाभुजगी हृदयगुहायांचिरतरंचिरकाले शेतेसुप्ताभवति एतदुक्तंभव
ति चेतोविलयेहृदयपुंडरीकेस्वात्मप्रकाशोभवति अथवाशेतेतिपदसामर्थ्यात्सुषुप्ताब्रह्मादिसर्वोपाधिल
येसति केवलाचितिरेवसुखात्मिकातिष्ठतीत्यर्थः ४९ मयीति मय्यधिष्ठानभूतेसुखबोधपयोधौसुखस्वरूपो
योबोधः सएवपयोधिः तस्मिन्पयोधौसमुद्रेमहतिव्यापके ब्रह्मांडबुद्बुदसहस्रंब्रह्मांडान्येवबुद्बुदः तेषांसह

कवलितचंचलचेतोगुरुतरमेरुकजातपरितोषा शेतेहृदयगुहायांचिरतरमेके
वचिन्मयीभुजगी ४९ मयिसुखबोधपयोधौमहतिब्रह्मांडबुद्बुदसहस्रे माया
विशेषशालिनिभूत्वाभूत्वापुनस्तिरोधत्ते ५० गुरुकृपयैवसनातनप्राक्तनभाग्य
प्रसूतमारुतया दुःसहदुःखतरंगस्तुंगः संसारसागरस्तीर्णः ५१

स्रमनंतानि ब्रह्मांडानीत्यर्थः मायाविशेषशालिनि मायैवविशेषस्तेनशालिनि शोभायमाने भूत्वातिरोधत्ते
भूत्वाभूत्वोत्पद्योत्पद्यतिरोधत्तेनर्हितंभवति ५० गुरुकृपयेति गुरुकृपयैवगुरुकृपालक्षणयैः सनातनास्पष्टैनो
कया प्राक्तनभाग्यप्रसूतमारुतया पूर्वजन्मसंचितेनयत् महद्भाग्यंपुण्यलक्षणं तदेवप्रसूतमारुतः अनुकूलवा
युः सोऽस्यास्तीति तया दुःसहदुःखतरंगः दुःसहान्यसह्यानियानिदुःखानितान्येवतरंगाऊर्मयोयस्मिन्सः एतादृ
शः संसारसागरः तीर्णः उत्तीर्णः पदयोरध्याहारः ५१

आ॰ वि॰ टी॰ ३१

सतीति सति विद्यमाने तमसि मोहरूपे अज्ञानरूपे यकारे विषममपश्यं सर्वं जगद्दृष्टवान् तदेतत्सर्वं दृष्टमिदमखि
लं समस्तं उदितवति बोधभानौ उदयप्राप्ते ज्ञानार्के किमपि न पश्यामि किमपि किंचिदपि नावलोकयामि तदिति किं
चित्रमद्भुतमित्यर्थः ५२ नाहमिति अहं देवान्न नमामि न नमस्करोमि यो देवान्नित्यातिक्रम्य स्थितः सो देवं देवान्नसेव
ते तद्वत् तदनंतरं विधानं विध्युक्तं कर्म न करोति तस्मै सर्वात्मभूताय यतते प्रयत्नवते महात्मने मौनमहस्मादरार्थं।

सति तमसि मोहरूपे विषममपश्यं तदेतदित्यखिलं उदितवति बोधभानौ किम
पि न पश्यामि किंचिदं चित्रं ५२ नाहं नमामि देवान्देवाननीत्य न सेवते देवम् न त
द्व करोति विधानं तस्मै यतते नमो नमो महात्मन् ५३ इत्यात्मबोधलाभं मुहुर्मुहु
रनुचिंत्य मोदमानेन प्रारब्धकर्मणोंते परं पदं प्राप्यते स्म कैवल्यम् ५४

द्विरुक्तिः ५३ इतीति इति यथोक्तमात्मबोधलाभं स्वात्मज्ञानप्राप्तिं मुहुर्मुहुः पुनः पुनः अनुचिंत्य मननगोचरीकृत्य
मोदमानेनानंदावस्थाप्राप्तेनाधिकारिणा जीवन्मुक्तेन प्रारब्धकर्मणोंते प्रारब्धकर्मावसाने देहावसाने परं कैवल्यं
निरुपमं मोक्षपदं प्राप्यते ५४ मोहान्धकारहरणमिति मोहान्धकारहरणं अज्ञानान्धकारनाशनं संसारो।
देहलसागरोत्तरणं संसार एवो देहलसागरः वेलामतिक्रांतः समुद्रस्तस्य तरणं पारप्रापकं पतन्नात्म।

स्वा॰
नि॰ टी॰
३१

निरूपणमेतदाचार्येण तेन प्रतिपादितं निरूपणं प्रकरणं दक्षिणामूर्तिः श्रीपरमशिवः अकृत कृतवान् एतावता आचार्यध्याय(?)कयोरैक्यता सूचिता भवति ५५ अज्ञानान्धविहन्तेति अज्ञानान्धविहन्ता अज्ञानमेवान्धमेव तमस्तस्य विहन्ता हरणसमर्थः विरचितविज्ञानपंकजोल्लासः विरचितः कृतः विज्ञानमेव पंकजं कमलं तस्योल्लासः विकासो येन सः मानसगगनतले मे मानसं मनस्तदेव गगनतलं व्योमतलं मम श्रीनिवासगुरुभानुः

मोहान्धकारहरणं संसारोद्वेलसागरोत्तरणम्। स्वात्मनिरूपणमेतत्प्रकरणमकृत दक्षिणामूर्तिः ५५ अज्ञानान्धविहन्ता विरचितविज्ञानपंकजोल्लासः। मानसगगनतले मे भासयति श्रीनिवासगुरुभानुः ५६ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितं स्वात्मनिरूपणप्रकरणं समाप्तः। १

श्रीनिवासः श्रीविश्वगुरुः स एव भानुः सहस्रकिरणः भासयति प्रकाशयति एतावता गुरुदेवतयोरैक्यभावनमेवात्मभावप्रकाशसाधनमिति प्रतिपादितं भवति ५६ चैतन्यद्युतिरुचिरां गोहारनिरस्तशमनतासंगः हृदयसरोजे विरजे भ्रमति भ्रमरो विलक्षणः कश्चित् १ इति श्रीमच्चिदानन्दविरचिता आर्याख्यासमाप्तः शुभमस्तु सर्वजगताम् ॥ ३२

नं० ५३-६०-घ

आत्मनिरूपणम् (वेदान्तशास्त्रम्)

पत्राणि ३२ (सम्पूर्णम्)

आर्या॰व्याख्या सहितम्

व्याख्याकारः सच्चिदानन्दः